221

39
1941

तुलसी
[illegible]टीकाप्रारंभः॥१८०० पृ० ३५

ब्रह्म॰

१

श्रीगणेशायनमः॥ श्रीसरस्वत्यैनमः॥ श्रीगुरुभ्योनमः॥ ज्ञातुंमदुक्तिलवमुद्धविरक्तिंतुशिष्यैः संप्राप्तितोल्पविदपि प्रतिपद्यसूतिं॥ श्रीभास्करोदितपितामहतुल्यकर्मवृत्तिंदधातुममलामहमुद्यतोस्मि॥ १॥ गणेशानमंदंतानंगुरुस्वर्यंसरस्वतीं॥ प्रणम्यपद्मनाभोहंकुर्वेटीकांमवासनां॥ २॥ तत्रादावविघ्नसमाप्त्यर्थंग्रंथारंभेभिमतदेवतानमस्कारमाचार्यः कुरुते॥ गणेशमिति॥ अहंभास्करः ब्रह्मसिद्धांततुल्यंकर्मप्रवक्ष्यामि॥ अथइत्यनंतरं॥ कस्मात्पूर्वंसिद्धांतपाटीगणितवसिष्ठसिद्धांततुल्यंकुतूहलग्रहकर्मत्वात्तस्मादनंतरंब्रह्मसिद्धांततुल्यंवेटकर्मप्रवक्ष्यामीत्यन्वयः॥ शेषंस्पष्टं॥ अत्रवेटकर्मप्रवक्ष्यामीत्युक्तं॥ तत्सिद्धांतादिष्वपिवेटकर्मैवमुख्यत्वेनसाध्यंनत्वन्यत्॥ ग्रहगणितनाम्नः प्रसिद्धत्वात्॥ अत्रचसिद्धांतलक्षणेनतंत्रलक्षणेनकरणलक्षणेनवाप्रोच्यते॥ तत्रकटीकरोति॥ लघुप्रक्रियामिति॥ विशेषणकरणलक्षणेनाभिधीयतइत्यवगंतव्यं॥ तत्कथं॥ कल्पादेरारभ्यगताब्दमासदिनादेः सौरसावनचांद्रमासादिमानमवगम्यसौरसावनगताहर्गणामध्यमादीनांकर्मोच्यते॥ तत्सिद्धांतलक्षणं॥ वर्तमानयुगादेरारभ्यैवंज्ञात्वोच्यते॥ तत्तंत्रलक्षणं॥ एषांक्रमाद्दृग्मध्यलघुप्रक्रियैवभवति॥ अतोलघुप्रक्रियत्वात्करणलक्षणेनैवतत्रगताहर्गणवासनाप्रक्रियोच्यते॥ शाकशनि॥ २॥ खरामाहतइति॥ ३॥ यस्मिन्नभीष्टमासग्रहाणांमध्यमाद्यंसाधनंसाधयितुमिष्टेतत्समधिकः शाकः पंचदिकचंद्रहीनः कार्यः॥ यच्छेषंतेग्रंथारंभस्यगताब्दाः॥ सौराभवंतिगताब्दकरणइत्यर्थः॥ स अर्कैर्द्वादशाभिर्निघ्नः॥ एवंगताब्दगणोमासीकृतः॥ सौरमासगणोज्ञातः॥ मधोश्चैत्रादिमासान्वितःकार्यः॥ ततोऽधिमासाःप्रसाध्याः॥ इत्यत्रकर्मव्यत्यासोगणितदोषंचदृश्यते॥ तत्कथं॥ येगतमासास्तेसौराः येचैत्रादिगतमासास्तेचांद्राएव अन्यजात्योर्योगोनसंभवतीति अतोत्रप्रथममधिमासान्प्रसाध्यसौरेषुसंयोज्यसर्वेचांद्राएवोत्पादिताः॥ तस्मान्मध्योर्यातमासान्वितइतिउक्तं॥ सकल्पितचांद्रमासगणः शशांगेर

वाप्राधिमासैर्युक्तःकार्यः॥ कस्मादेवाप्तैः॥ अधोद्विनिघ्नात्॥ किंलक्षणात्वरसांगान्विनात्॥ पुनःकिंलक्षणात्॥ स्वाभ्रखांकांशाहीनात्॥ शशांगेरवाप्ताधिमासैरिति॥ अत्ररसांगान्विनादित्युक्तं॥ तस्योपपत्तिर्यथा॥ ग्रंथारंभेषट्षष्टिरधिमासशेषमभूत्॥ पंचषष्टिभिःपक्षैरेकोधिमासस्तदपेक्षायांतःक्षिप्तं॥ स्वाभ्रखांकांशहीनादस्योपपत्तिः कल्पसौरपक्षाः कल्पाधिमासैर्हियंतेतत्रपंचषष्टिर्लभ्यंते॥ शेषंकिमप्युर्वरितं॥ तत्कल्पसौरपक्षाणांकिंचिन्न्यूनाष्टनवत्यधिकाष्टशतांशा८९८।४० सत्राचार्येणस्वल्पांतरत्वाल्लाघवाच्चस्वाभ्रखांकांशाकृतः पंचषष्टिपक्षैरेकोधिमासस्तस्माद्द्विगुणमासानांपंचषष्ट्याभागोगृहीतस्तेधिमासास्तैरन्वितःसौरमासगणश्चांद्रस्यादित्युक्तं॥ असौरखरामाहतः पुनस्त्रिंशाद्भिर्गुणनीयः॥ एवंचांद्रस्तिथिगणोज्ञातः॥ सयातनिथ्यन्वितःकार्यः॥ सयुगांगेरवाप्तावमोनः अधस्त्रियुक्तात्किंलक्षणात्त्वरामाभ्रशैलांशयुक्तात्त्रियुक्तादितिग्रंथारंभेचतुःषष्ट्याएकोवमस्तदपेक्षायांतरावमशेषंत्रयस्तेयोज्याः॥ रामाभ्रशैलास्तेषामुपपत्तिर्यथा॥ कल्पचांद्रदिनाः कल्पावमाश्चपरस्परमपवर्तिताचांद्रदिनस्थानेरामाभ्रशैलाः॥ अवमस्थानेएकारामाभ्रशैलाः सैकाःक्रियंते॥ तदाचतुःषष्ट्याएकादशालभ्यंतेतस्मात्तेरामाभ्रशैलैःहीयंते॥ तदेकएवलभ्यतेमतेषुयुक्तैः कार्यः॥ अतःखरामाभ्रशैलांशयुक्तादित्युपपन्नं॥ युगांगेरवाप्तानमोनस्तैः प्राप्तावमैश्चांद्रदिनगणोहीनः कार्यः॥ सजीववारादिकोदर्गणस्यात्॥ ग्रंथारंभेजीववारोभूत्तमतस्माज्जीववारादिकइत्युक्तं॥ इतिग्रारंभादारभ्यएतेभूनदिना अर्कसावनाइतिएतावंतः सूर्योदयाज्जाताइत्यहर्गणः सिद्धः॥ तत्रत्राधिमासावमसाधनस्यकोसत्तिर्दर्शिता॥ एवंपंचषष्टिभिः पक्षैरेकोधिमासस्त्रिंशादिनात्मकोगृह्यतेतत्रद्वात्रिंशद्भिः सार्धैः पंचदशातिथयः अधिकाः कस्मान्नगृह्यंते॥ अथचप्रतिवर्षंएकादशादिनाः सौरचांद्रावर्षंतेः ते

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

पि प्रतिवर्षं कस्मान्न ग्रह्यते इति॥ तदोक्तं भास्कराचार्येण॥ अहर्गणस्यानयने कं मासाश्चैत्रादिचांद्रगण कान्विताकि
कुतोधिमासावमशेषं केचित्कुर्यतः सावयवोनुपातः॥ ॥ अस्य पूर्वार्द्धस्योत्तरं दर्शितं॥ द्वितीयार्द्धस्योक्तं॥ क्षेपक
स्योत्तरं यथा॥ यद्यधिमासाः सावयवा ग्रह्यंते तदा तद्युक्ताः सौरमासा स्तिथ्यश्चांद्रदिना भवंति॥ वर्तमानो मास
सौरएव भवति॥ संक्रमावधिरित्यभिप्रायः॥ यतो दर्शांततः संक्रांत्यधिवेदिनानि वायांति सावयवानि तेभ्यो नु
पातः॥ अधिमासशेषं प्राप्यते॥ तद्यथा॥ यदि त्रिंशद्भिर्दिनैरधिमास तुल्यमधिमासशेषं लभ्यते तदैभिः सावय
वैः किमिति॥ अतस्तस्मिंस्त्यक्ते दर्शांतमासएव भवंति॥ अतउक्तं॥ दर्शावधिश्चांद्रमसो ह्यादित्यादिन्यथा॥ दर्शाय
तः संक्रमकालतः प्राक् संदेवतिष्ठत्यधिमासशेषं॥ दर्शांततो यातथिनिप्रमाणैः सौरैस्तु सौरादिवसाः समेताः
यतोधिशेषो ह्यादिनाधिकास्तेत्यक्तं च तस्मादधिमासशेषं॥ तथावमा अधिमासावयवा ग्रह्यंते॥ तदा तेस्तिथ्यांडा
स्तेगतसावनाभवंति॥ ताभिः सहानुपातेवमशेषं प्राप्यते॥ तद्यथा॥ यदि षष्टिघटिकाभिरेवमतुल्यं तदेवमशे
षं लभ्यते॥ तदाभिः सावयवाभिः किमिति अग्रावमशेषं स्यात्॥ अतस्तस्मिंस्त्यक्ते सूर्योदयिकोहर्गणः स्या
दिति॥ सावयवेषु गृहीतेषु मध्यमतिथ्यंताहर्गणो भवतीत्यतस्त्यक्तं॥ यतउक्तं॥ तिथ्यंतसूर्योदययोस्तम
ध्यमं देवतिष्ठत्यवमावशेषं॥ त्यक्तेनतेनोदयकालिकः स्यात्तिथ्यंतकाले युगणो
न्यथाचे॥ ग्रंथारंभे चैत्रशुक्लप्रतिपदि सूर्योदयिकामध्यमा ग्रहास्तेग्रहाणां ध्रुवकाः
सूर्यादीनां तेयथाक्रमेणोच्यंते॥ दिनाइति॥४॥ कुजइति॥५॥ युगानीति॥६॥ व
क्ष्यमाणविधिना ध्रुपिंडोस्थोग्रहस्येनराश्यादिना क्षेपकेण युतः सन् लंकानगर्यां
सूर्योदयकालिको मध्योभवेदिति॥ अथ ध्रुपिंडात्सूर्यानयनं॥ अहर्गणइति॥

क्षेपकाः

सू	चं	उ	पा	मं	बु	गु	शु	श
०	०	४	९	७	२	३	८	८
२०	२०	०७	००	२०	२०	४	०५	३
०३	५	०२	२५	२०	००	०	५	०३
०	५०	५९	९	२०	३०	५१	५५	००

43
1941

अहर्गणः पृथक् स्थाप्यः विश्वगुणइति त्रयोदशभिः संगुण्य त्रिखांकैर्भक्त इति त्रिभिरधिकैर्नवशतैर्भागो हार्यः
फलमंशाल्लभ्यते॥ शेषं पश्चात्संगुण्य पुनस्तेनैव त्रिखांकैर्भक्त इति त्रिभिरधिकैर्नवशतैः भाजितफलं नाः कलि
ताअंशाधःस्थाप्याः॥ एवमंशाः कलाविकला अधोधस्त्रिस्थं फलं भवति॥ एवमग्रे सर्वत्र परिभाषेयं॥ तत्फल
मंशाद्यमहर्गणतुल्यांशेभ्यः पात्यो अथांशेभ्योंशानुसंशोध्यतस्मादेकं गृहीत्वा तस्य षष्टिकलानां कृत्वांशा
धस्थाप्यफलकलाः शोध्याः पुनः स्वाभ्यएकं गृहीत्वा तस्याः षष्टिविकलाः कृत्वा कलाधः स्थाप्याः॥ फलं विकलाशो
ध्याः॥ इति कृते यो देवाहर्गणः फलेन तेनांशादिनोनोजातः सलवाद्यः सूर्यस्यात्॥ सएव बुधः शुक्रश्च॥ एवं र
विज्ञशुक्राद्युपिंडोत्था जाता अंशाद्याः॥ तेषामंशानां त्रिंशद्भिर्भागो हार्यः॥ शेषमंशाः लब्धराशयः तदुप
रिस्थाप्याः॥ तेषां द्वादशभिर्भागो हार्यः शेषं राशयः फलं भगणास्तदुपरिस्थाप्याः॥ एवं कृते भगणराशिअं
शाकलाविकलाग्रहः स्यात्॥ भगणास्तु ग्रंथारंभादिशदहर्गणादवधिद्वादशानां पर्ययागताः॥ तेषां प्रयोजना
भावादपगमः कार्यः॥ सूर्येंदुग्रहणे पर्वेशज्ञानप्रयोजनात्सूर्यपातयोरक्षणीयाः॥ एवं राश्यादिकं सूर्यस्य पूर्वो
क्तक्षेपकादिशोगोयमाइत्याद्यः क्षेप्यः॥ सराश्याद्योलंकानगर्यां सूर्योदये मध्यमः स्यात्॥ इति सर्वत्र परिभा
षेयं॥ असावेव मध्यमो बुधः॥ शुक्रश्च॥ अत्र भाज्यभाजकयोर्ग्रहानयने पर्वतमध्ये बीजात्यंतनूतान्युक्ता
क्तानि॥ तानि सांतरितानि तन्निरासार्थं गतावदांगांशेनाद्यः सन् सबीजो मध्यमो भवति॥ शुक्रो मध्यमः
तत्र रविर्गताद्वृंदस्य चतुःषष्ट्यंशैर्नर्तनः कार्यः॥ सरविर्मध्यमः शुक्रो भवति॥ यावंत एव कल्पे रविभगणा
स्तावंत एव बुधशुक्रयोः भगणास्तस्माद्रविज्ञशुक्रा मध्यमास्तदा एवेत्यक्तं॥ अथास्यानयने गुणकभा

नक्षत्रोरूपा। त्यनिर्यथा॥ अस्यदिनगतिः ०।५०।८ एकांशः एकपंचाशद्विकलाभिरेकोनपंचाशद्विकलाभिरेकोनपंचाश
द्विकलाष्टांशास्तत्यक्षंशयुक्ताभिर्हीनः॥०॥ असौ एकांशस्यकतिमांशाइति ज्ञानस्योपायोयथा॥ एकांशस्यकेन
चिद्दिष्टेनभागोद्दियतेतत्रावदेवतत्फलंप्राप्यते॥ तद्दिष्टज्ञानाय अनेनैवएकांशस्यभागोहार्यः॥ फलंतद्दिष्टंभव
ति॥ तद्यथा॥१॥०।२८। एतेनरूपेभक्तेकलादिकंफलंलभ्यते॥ तद्भागादिकरणेएतत्स्वासंगुणितंजातं॥६०
२८। अनेनरूपेभक्तेभागाद्यंफलंभवति॥ एतदहर्गणेरूपगुणे अनेनभक्ते ६०।२८ भागाद्यंयत्प्राप्यतेतेनाहर्गणो
न्यूनःक्रियतेसभागाद्यःसूर्यःस्यात्॥ अत्रभाजकोद्दिष्टःसकेनचिद्दिष्टेनतथागुण्यतेयथानिरवयवःस्यात्॥ त
द्दिष्टंकल्पितं॥ द्विकेन१३।५६ तथात्रयोदशभिर्तेन९०३।४ तथापंचदशकेन१०४२ अत्राचार्येणत्रयोदशभिर्तेन
गुणकभाजकौउक्तौ॥ तथाद्विकेनकेश्चिदुक्तौदस्रघ्नोद्यगणोंकविश्वविहतइति॥ अथान्यप्रकारेणरविकल्पेभ
गणाःषष्ट्याधिकशतत्रयेणगुण्यंते॥ सूर्यस्यकल्पेभागाभवंति॥१५५२००००००० कल्पभूदिनानितान्यपिसू
र्यकल्पभागाःकल्पिताः१५७७९९६४५०००० एतेपूर्वभागेभ्योयेरधिकास्तैरेभिः२२७९९६४५०००० महत्रैराशि
कं॥ तद्यथा॥ यदिकल्पभूदिनानामेतावदंतरंलभ्यतेतदेष्टाहर्गणस्यकिमिति॥ इत्यहर्गणस्यायं२२७९९६४५०००० गुणः भूदिनानिभागहारः फलमिष्टाहर्गणाच्छोध्यं॥ तद्दशाद्याःसावयवइष्टदिनामध्यमःसूर्यस्यात्॥ उभयोर्गुण
कभाजकयोर्लाघवार्थं॥१७४७४१०००० अनेनापवर्तनः कृतः गुणकस्थाने जाताः भाजकस्थाने ९०३ स्वल्पांतरत्वात्
त्यागकृतइत्यपपन्नं॥ ॥ अथचंद्रानयनं॥ ॥ अहर्गणइति॥ ॥ व्याख्या॥ अहर्गणोहर्गणः शक्रगुणः श
क्रेश्वतुर्दशभिर्गुण्यः स्वात्यष्टिभागेनहीनः॥ एतदुक्तंभवति॥ यः शक्रगुणः सएवष्टकस्थाप्यः॥ सतद्दशभिर्भा
ज्यः फलंभागादित्रिस्थंगृहीत्वाशक्रगुणमध्येशोधयेत्॥ सभागादिश्चंद्रस्यात्॥ किंलक्षणः स्वाभ्ररसाष्टभक्ताद

हर्गणाच्छतेनत्रिस्थेनफलेनहीनः कार्यः॥ सलग्नादिकस्त्रिंशद्भिर्द्वादशभिश्चाग्रतउपरिस्थाप्यसक्षेपकेणयुक्तः
कार्यः॥ समध्यमश्चंद्रोभवति॥ अत्रगुणकभाजकानांमुत्पत्तिर्यथा॥ चंद्रस्यदिनैकगतिभागाः९३। कला१०वि
कला३४ तत्यक्षंशा ५२।३२ अत्रचतुर्दशोवभागाः कल्पितास्तेभ्यः किंचिन्न्यूनं॥ तद्यथा॥ भा० कला४९वि२५
तदंशाः ७।२८ एतच्चतुर्दशानांकतिमांशाइतिएभिर्भागोहार्यः॥ यल्लभ्यतेसतितिमभागोन्यूनइतिभाजक
जकस्यसावयवत्वान्निरारंभस्यासवर्णितात्वाभौभाज्यः॥ ३०२४७००भाजकः१७४९०७ अनेनभाज्येहतेल
ब्धं१० किंचिन्न्यूना अतउक्तंशक्रगुणोविहीनः कर्तुंयुज्यतेतदंशाद्वादशभिर्दिनैरंशाः०क०विकला५ तस्मा
दंशाः१।२४ एतदधिकंभवति॥ अतोनुपातः॥ यदिआभिर्विकलाभिःसावयवाभिर्द्वादशादिनानिलभ्यंतेतदैकेनां
शेनकतिदिनानीतिएकजातिकरार्थंएकांशस्यविकला३६०० एताद्वादशभिर्गुणिताजाता४३२०० पंचभिःसा
वयवाभिर्भागोहृतेनिरवयवार्थंसुभौभाज्यभाजकौसवर्ण्यंभागेहृतेलब्धं८६०० रसाभ्ररसाष्टविलक्षणपपन्नं॥ अ
थान्यइगणेरपवर्तनीयथाचंद्रभगणाः५७७५३३००००० कुदिनाश्च१५७७९९६४५०००० अहर्गणेभगणे
गुणेकुदिनेभक्तेभगणाद्योग्रहाभवतितदत्रभागाद्यानयनार्थंभगणांशैर्भाज्योगुणनीयः॥ अथवाभाजकोप
वर्तनीयः॥ अत्रभाजकेअपवर्तितेदृढभागहारोयं४३८३९०९२५० गुणकभाजकयोर्लाघवार्थमेवापवर्तनै
२९९८० कृतेजातोगुणकः१९३६३९४ भाजकः१४६२०० अनयोःशेषे ७८८०॥२५२५० स्वल्पत्वात्रक्षेतथा
पिगुणकभाजकौस्थूलौ॥ ततोत्रबुध्याकल्पनीयौ॥ यथाभाज्यभाजकस्यास्य१४६२०० भागहारदृष्टःकल्पि
तः१७ येनछेदस्यात्॥ अनेनभक्तेलब्धं८६०० अनयालब्ध्यागुणोभक्तः१९३६३९ लब्धं२४ अतउपपन्नेभा
जकद्वयं॥ यथा॥ एकत्रसमदशा१० तत्रगुणकः शतद्वयंचतुर्विंशत्यधिकंअन्यत्रभाजकः८६०० गुणको

रूपंस्यनेत्वा दृणोगुणकोयथा॥ २२४।१७।८६०० असावपिगुणः स्फुटः २२४ तस्माल्लाघवार्थं चतुर्दशाभिर्भ
र्भक्तः लब्धोऽशरूपोनाः सप्तदश १७ तस्मात्स्वकीयेनसप्तदशांशेनोनाः॥ अतोहर्गणश्चतुर्दशाभिर्गुण्यः
स्वसप्तदशांशोनः कार्यइत्युपपन्नं॥ तत्रस्फुटारेणाहर्गणेनिहन्यादित्यादिनासवर्णितेजातं २२४।१० इत्युपपन्नं॥
अथचंद्रोच्चपातानयनं॥ गणोद्विधागोभिरिति॥ गणोद्विधास्थाप्यः॥ एकत्रगोभिर्नवभिर्भाज्यः॥ अन्यत्र १९
इनाभ्रवेदैरिति चत्वारिंशच्छेन द्वादशाधिकेभाज्यः उभयोर्लब्धयोरंशेनदशादिविधूच्चंभवेत्॥ सधू २
वकेणयुक्तंकुर्यादिति॥ ॥ अत्रोपपत्तिर्यथा॥ ॥ चंद्रोच्चभगणा ४८८१५८५८ अंशादिफलानयनार्थं
दृढकुदिनाः ४३४३१०१२५० अनयोरपवर्तनं कल्पितं १२१३८९ अपिवर्तिताभगणाः ४०१२ शेषं ६८९ त्यक्तं
भगणागुणः॥ तथा दृढकुदिनान्यपवर्तितानिलब्धं ३६१०८ शेषस्यवर्गत्वासरूपंलब्धंतदेवभाजकस्फु
टत्वात्पुनरपवर्तनः कृतः भाजकइष्टेननवकेनभक्तोयथानिः शेषस्यालब्धं ४०१२ इष्टरूपगुणंपूर्वगुणका
दस्मा ४०१२ छोधितं अनेनपूर्वलब्धिर्गुणितालब्धंरूपंतस्माद्गुणकोद्विधारूपमेवजातः॥ भाजकस्फुट
कत्वनव अन्यत्रइनाभ्रवेदाः ४०१२ इष्टंगुणंरूपशोधितंतस्मादुभयोर्गुणकयोर्गुणकोरूपमेवजातोय
दिलब्धिद्वयंवा अधिकंयावल्लभ्यतेतदालब्धिसमोगुणकोभाजकस्यास्य ४०१२ कल्प्यते॥ इष्टंयावद्गुणं
शोध्यतेतदेवगुणकइष्टसमोभाजकस्यास्यभवेत्॥ अतोभयत्ररूपंकल्पितंतस्मादहर्गणस्यद्विधारूप
मेवगुणकः कल्पितः भाजकस्येष्टलब्ध्यानयाचैवोभयत्रभाजकोकृतावित्यभिप्रायइत्युपपन्नं॥ ॥ अथचं
द्रपातानयनं॥ ॥ द्विधाकचंद्रेरिति॥ ॥ अहर्गणोद्विधाभांशायोगश्चंद्रपातोभवतिकेराभांशाएकत्रांक

४

47
1941

चंद्रे १९ रकोनविंशतिभिः॥ अत्रखखभे २००० राभांशानांयोगइति॥ अहर्गणोद्विधास्थाप्य आभ्यांप्राग्गु
णकाभ्यांभाजकाभ्यांभजेत्॥ अंशादिफलयोगः कार्यः॥ स्वक्षेपकोयोज्यः सचंद्रपातस्यात्॥ ॥ अत्रोपप
त्तिः॥ ॥ पातभागणाः २३२३११६८ दृढकुदिना ४३८३१०१२५० अनयोरपवर्तनः कृतः॥ कल्पितः ८५४४ अ
नेनभगणाहतोलब्धं २७१९ असौगुणस्तथा कुदिनहतालब्धं ५१३०० असौभाजकः॥ अस्मादीष्टंकल्पित
१९ अनेनभाजकेहतेलब्धं २००० इष्टमेकगुणंपूर्वकगुणकादस्मात्॥ २७१९ शोध्यतेनावशेषंपूर्वलब्धि
समंस्यात्॥ अतः प्राग्वदहर्गणस्यद्विधारूपमेवगुणकभाजकौ १९।२००० एतावित्युपपन्नं॥ ॥ अथभो
मानयनं॥ ॥ रुद्रघ्नइति॥ ॥ रुद्रघ्नेत्येकादशभिर्गुणोहर्गणः स्थाप्यः द्विधाएकत्रराशियमे २१ रन्यत्र वेदा
ब्धिसिद्धेषु ५२४४४ विभज्यउभयत्र अंशादिफलंत्रिस्थंग्राह्यं॥ एकत्रसंयोज्यराश्यादिकंकृत्वाक्षेपकेण
युतंसतंसदिनानंदनोभौमः स्यात्तमध्यमः॥ ॥ अत्रोपपत्तिः॥ ॥ भौमस्यभगणाः २२९६८२८५२२ दृढकुदि
नाः ४३८३१०१२५० अनयोरपवर्तनाद्भौमशतेनसंगुण्यापवर्तकल्पितः २९७१८५ अनेनभक्तौजातौभगणस्था
ने ५००११५ कुदिनस्थाने ११०१३२४ एतौगुणकभाजकौ॥ पुनः प्राग्वद्भाजकइष्टेनानेन २१ हतोलब्धंपुनरि
ष्टं २१ एकादशगुणं २३१ भगणस्थानांकेविशोध्यइष्टहतेभाजकांकेनानेन ५२४४४ विभज्यलब्धं २१ अतोरु
द्रघ्नोहर्गणोद्विधास्थापितः एकत्रइष्टेनानेनभक्तः २१ लब्ध्यानया ५२४४४ भक्तइत्युपपन्नं॥ ॥ अथबु
धानयनं॥ ॥ वेदघ्नइति॥ ॥ व्याख्या॥ ॥ युगणोहर्गणोवेदघ्नश्चतुर्भिर्गुण्यः स्वकीयदहनाढ्यंशेन ४३
युक्तः कार्यः॥ एतदुक्तंभवति॥ वेदघ्नोहर्गणः पृथक्स्थाप्यः त्रिचत्वारिंशताभागमपहृत्य अंशादित्रि

स्फुटफलं ग्राह्यं॥ वेदघ्नाहर्गणेसंयोजयेत॥ तद्भागादिज्ञ चलं बुधस्यशीघ्रोच्चं स्यात्॥ कथंभूतं गणादहर्गणात क्षिति
यमेंद्रोच्चकेवर्जितं॥ एकविंशत्यधिकचतुर्दशशतो १४२१ रामोच्चकेवर्जितं कार्यं॥ स्वक्षेपयुतं मध्यमं ज्ञ चलं स्यादि
ति॥ अत्रोपपत्तिर्यथा॥ ॥ बुधचलोच्चभगणाः १०९३६०९८९८४ दृढकुदिनानि ४३८३१०१२५० अनयोरपवर्तनः ७१
७३३ लब्धं भगणस्थाने २५००५२ असौ गुणकः॥ अथ कुदिनस्थाने ६११०३१ असौ भाजकः॥ पुनरिष्टं ४३ अनेन भा
जकेहृते लब्धं १४११ पुनरिष्टरूपगुणं लब्धा गुणकः २५१००५९ संयोज्य जातं २५००५९ पूर्वलब्धानया १४११ भ
क्तं लब्धं १७६ असौ एकोगुणकः द्वितीयो रूपगुणः अनयोर्यथाक्रमं छेदौ ४३।१४११ रूपगुणमिष्टकृतं युक्तं॥ तस्मा
दुभयोः फलयोरंतरं प्राप्तं पुनरपि चंद्रगुणवदत्रापि क्रिया कृता यथा बृहद्गुणस्यास्य १७६ चतुर्भिर्भागे हृते श्च तुश्च
त्वारिंशल्लभ्यते ४४ स्वभाजकादेकाधिकः तस्माच्चत्वारिंशदंशोना अधिका जाता तादृशानि [१/४३] सांशक्ष
पेणतिमवर्णिता जाता १०६।४३ अतउक्तं वेदघ्नोयुच्चयइति॥ अपवर्तनत्यागस्तत्रैवपठितं॥ अथ गुरोरानय
नमुच्यते॥ ॥ गणोद्विधेति॥ ॥ गणइत्यहर्गणोद्विधाएकत्रार्के १२ रन्यत्रभयमाब्धि ४२२ अभिभक्तोफलोत्था
तरंफलमंशादित्रिस्थं ग्राह्यं॥ अंतरं कुर्यात॥ मंदंदमंत्रीगुरुरंशाद्योभवतिपुनः राश्यादिस्वक्षेपकेणाढ्यं लब्धा म
ध्यमोगुरुः स्यादिति॥ ॥ अत्रोपपत्तिः॥ ॥ गुरुभगणाः ६४२२६४५५ कुदिनाः ४३८३१०१२५० अनयोरपवर्त
नं ८६४११ लब्धं दृढगुणकः ४२।१२ भागहारः ५०७२४ अत्रभागहारेइष्टेनानेन १२ हृते ४२२० तथेष्टं १२ रू
पगुणं दृढगुणकेप्रक्षिप्य जातं ४२२० प्राग्वद्धृते लब्धं रूपं तस्माद्दुभयगुणकौ रूपं छेदौ क्रमेण जातौ १२।४२२०
इष्टरूपगुणं क्षिप्तं तस्मात्फलयोरंतरं प्राप्तमित्युपपन्नं॥ अथ शुक्रचलोच्चानयनं॥ ॥ तथाहतइति॥ ॥ भक्त

इति॥ ॥ अत्रोच्चयोर्गणः तथाहतोसौ द्विधास्थाप्यः एकत्र भूबाणवेदाद्रिभिः ७४५१ अन्यत्राभ्रचंद्रैर्भक्तः फलयोर्यल्लब्धं
एकं तद्दैत्यगुरोश्चलोच्चं जायते॥ स्वक्षेपणाढ्यमिति सर्वत्र॥ ॥ अत्रोपपत्तिः॥ ॥ शुक्रचलोच्चभगणाः ७०२२३८९४९२ कुदि
नाः ४३८३१०१२५० अनयोरपवर्तनं निःशेषं नास्ति॥ यतस्तुल्यत्वाच्छेषं त्यक्तुं न शक्यते॥ तदपवर्तनोपायो यथा॥ प्रथमं भुजोन
वति ९० संगुणाद्विपंचाशल्लक्षैश्चतुर्नवतिसहस्रैस्त्रिभिः शतैरेकादशाधिकैः ५२९४३११ रपवर्तनः कृतः॥ गुणकस्थाने ११
९३२६ भाजकस्थाने ७४५१० लब्धाः पुनरपि भाजकैकादशाभिरिष्टैरपवर्तितः लब्धं ७४५१ निःशेषभागहारेगतः॥ अनया
लब्धया ७४५१ गुणकस्यापि भागो गृहीतः षोडशोर्वरिताः॥ अतो भागहारोत्पत्त्यक्तवज्जातौ गुणषोडशः॥ क्रमेण
भाजकौ ७४५१।१० शेषोर्वरितत्वाद्दुभयोः फलयोर्योगः स्यादित्युपपन्नं॥ ॥ अथ शनेरानयनं॥ ॥ भक्तइति॥ ॥ त्या
ज्या॥ ॥ अहर्गणइत्यनुवर्तते॥ असौ द्विधास्थाप्यः एकत्राभ्ररामैस्त्रिंशद्भिर्भक्तः॥ अन्यत्र तुरंगागरामनंदैः ९३६७ भक्तः
उभयोरंशादित्रिस्थं फलं ग्राह्यं॥ तयोरंतरं भागादिः शनिः॥ पुनराश्यादिकं कृत्वा क्षेपकसंयोज्य मध्यमः शनिः स्या
त्॥ अत्रोपपत्तिः॥ ॥ शनिभगणाः १४६५७२९८ कुदिनाः ४३८३१०१२५० एतैश्चतुर्भिः संगुण्य अनेन भा ६२३८
पवर्तितौ गुणकभाजकौ॥ गुणकः ९३९० भाजकः २८१०११ पुनरपवर्तनार्थं भाजकस्त्रिंशद्भिरिष्टैर्भक्तः ९३६०
अथैकं शेषं त्यक्तं॥ तदिष्टं ३० रूपगुणं गुणके ऋणं क्रियते नावल्लब्धिसमं स्यात्॥ ९३६० इत्यतोत्र गुणकौ द्विधा रूपं
प्राप्तः॥ क्रमेण भाजकौ ३०।९३६० इष्टस्य ऋणत्वात्फलयोग इत्युपपन्नं॥ ॥ एवं ग्रहाः सर्वे मध्यमा जाताः॥ परं तु
कार्यो मध्यमसूर्योदयिकादेशांतरेणवक्ष्यमाणेन संस्कृताः संतः स्वदेशे मध्यमसूर्योदयिकास्युः॥ अथ ग्रहाणां दि
नगत उच्यते॥ नंदाभ्राइति॥ ॥ एवं सूर्यादीनां चंद्रोच्चसहितानां यथानुक्रमेण कलाद्यादिनगतय उक्ताः॥ रूपमह

ग्रहाणांदिनगतयः

र	चं	उ	बु	मं	बु	गु	शु	श
५७०१	६	३	४	२४	५	१६	२
८ ३५	११	८	२९	१२	०	८	०

परिकल्प्यप्राग्वत्सर्वेसाध्यं तो कलाद्यादिनगति तुल्याभवंतीतिभमंडलस्यएतावंत्यः कलाःप्रत्यहंपृथक्पृथक्ग्रहाःनिजनिजकक्षायांपूर्वाभिमुखंभ्रंतीतिभावः॥ तत्कथं॥ प्रवाहानिलक्षिप्तजवेन निपतन्पश्चिमाभिमुखंभमंडलंदक्षिणोत्तरध्रुवद्वयाधारंसग्रहंपरिभ्रमतिग्रहाश्चतदाश्रिताः पश्चिमाभिमुखंपरिभ्रमंतोपिपूर्वाभिमुखंशीघ्रमंदतरभिन्नगत्याविचरंतीति॥ यद्येवंतर्हितेषांग्रहाणांमेषमार्गस्थितानांमध्यमगतेः शीघ्रमंदत्वमित्यन्यादृक्षत्वंकथंसंभवतीत्यतः पृथक्पृथक्मार्गगताभ्रमंतीतिमिश्रं॥ गतरमदृशत्वंकस्मादित्युच्यते॥ योहिभुव आसन्नः स्वस्वल्पकालेनभगणंभुंजीयात्॥ तस्यशीघ्रगतित्वंसंभवति॥ यस्तद्दूरगः समहताकालेन तस्मात्तस्यमंदगतित्वमितिपरिपाद्यएकस्मादेकस्मादन्योमंदगतिरितिसंभवति॥ तथाचोक्तंसिद्धांते॥ कक्षाःसर्वाअपिदिविमदांचक्रलिप्तांकिलास्वाद्यनेलब्ध्वोलघुनिमहतिस्वर्महत्यश्चलिप्ताः॥ तस्मादेतेशशिजभृगुजादित्यभौमेज्यमंदामंदाक्रांताइवशशधराद्भांतियांतःक्रमेण॥ ग्रहकक्षोपरि अष्टमंभचक्रंतदेतदेवराशिमंडलंतत्रसमाद्वादशराशयस्तदंशालेक्षत्रांशास्तस्यपूर्वाभिमुखंनियतगतेरभावः॥ प्रवाहिनिलप्रक्षिप्तंपश्चिमाभिमुखमेवपरिभ्रमतिइतितदा॥ राश्यंशकलावयवभागवशाद्ग्रहाणांशीघ्रमंदत्वमुक्तं॥ ननुमार्गवशाद्योहियोजनात्मकोदिनगतिमार्गःसर्वेषांग्रहाणांसमएव॥ ॥अतउक्तं॥ ॥समागतिस्तुयोजनैर्नभःसदांशदाभवेत्॥ कलादिकल्पनावशात्कदुक्तवाचसास्मृतेति॥ एवंग्रहाणामेवनतुनक्षत्राणां॥ नक्षत्रचक्रंतुसतारकंध्रुवयोर्द्वद्वमपिप्रवाहानिलस्यातिजवेनाहतंसत्एकत्रस्थिरत्वेनस्थातुंनशक्नोतीति अतः किंचित्प्राक्पश्चाच्चलतीत्यवगम्यते॥ कस्माद्विषुवायानचिन्हादयस्थानात्तेकत्रावस्थितत्वात्॥ विषुवायनचिह्नानिस्वदेशेस्था

नादेति क्रांतानिदृश्यंते॥ तथाचक्रंप्राक्चक्रंभवति॥ अनागतप्राप्तानितदाप्रत्यक्चलितमितिज्ञेयं॥ ॥अतउक्तंसूर्यसिद्धांते॥ ॥ प्राक्चक्रंचलितंहीनेछायाकर्षणागते॥ अंतरांशैस्तथाप्रत्यक्पश्चाच्छेषेप्रथाधिके॥ इति॥ कस्मात्स्थानात्॥ प्राक्पश्चाच्चलितमात्रंदृश्यते॥ यथा॥ यस्मिन्विषयेदक्षिणोत्तरक्षितिजस्थोध्रुवोभवतः॥ सनिरक्षदेशः॥ तस्मिन्समंपूर्वापरंवृत्तंतद्विषुवद्वृत्तसंज्ञं॥ अनुचयस्मिन्मार्गेसूर्यः पूर्वगत्याद्वादशराशीन्भुनक्तितद्वृत्तस्यक्रांतिमंडलसंज्ञाराशिमंडलसंज्ञाच॥ एवमुभयोः क्रांतिवृत्तविषुवद्वृत्तयोः षडंतरेसंपातद्वयंवर्तते॥ तेसंपातेराशिमंडलेमेषतुलादिसंज्ञेतयोर्विषुवत्संपातेयोः प्राग्परिक्षितिजस्थयोस्त्रिभंतद्विषुवद्वृत्तसक्षिणोत्तरतश्चतुर्विंशत्यंशांतरेक्रांतिवृत्तदक्षिणोत्तरवृत्तयोः संपातद्वयंमृगकर्कादिसंज्ञंभवति॥ तयोरयनसंज्ञा॥ एवंविषुवायनचतुष्टयंराशिमंडलस्थंप्रत्यक्भ्रमणवशात्क्षितिजेयत्रयत्रोदेतितत्रतत्रक्षितिजेपितेषांताएवसंज्ञाज्ञेयाः॥ गोलमध्येविषुवत्संज्ञातत्रतद्दक्षिणोत्तरश्चतुर्विंशत्यंशैरयनसंज्ञा॥ एवंचिह्नचतुष्टयोनोदक्षिणोत्तरंचक्रंचिह्नंउदेति॥ तस्माद्भचक्रंचलितमित्युच्यते॥ एतदुक्तंभवतिसर्वोपरिराशिमंडलंतत्रद्वादशराशीन्सूत्रेस्वस्वकक्षास्थितोग्रहस्तिष्ठतिसावयवान्समानूपरिकल्प्यमध्यप्रमाणानिसूत्राणिलक्ष्याणि॥ यस्मिन्यस्मिन्सूत्रेस्वस्वकक्षास्थितोग्रहस्तिष्ठतितस्मिन्तस्मिन्राशौनक्षत्रांशाद्यवयवस्तोज्ञेयः॥ एवंश्रीब्रह्मणाराशिमंडलंसनक्षत्रंतदधिष्ठितग्रहकक्षायुक्तंदक्षिणोत्तरध्रुवयोर्बंधात्रसर्वग्रहान्मेषादिचिह्नसूत्रगान्स्थिरान्संस्थाप्यएवंभचक्रंसृष्ट्वाप्रवाहानिलस्यपश्चिमाभिमुखंभ्रमत्वेननियुक्तं॥ ग्रहास्तुपूर्वाभिमुखमपिभ्रमत्वेनियुक्ताः॥ ततःसर्वेग्रहाएकदाशसहस्राणिअष्टशतानिपादोनैकोनषष्टिसहितानियोजनानिस्वस्वमार्गेप्रत्यग्भ्रमंतोपिपूर्वाभिमुखंभ्रंतुंप्रवृत्ताः॥ तत्रस्वस्वकक्षास्थितलि

नानामहत्वाल्लिप्ताधश्चेनशीघ्रमंदतराद्यमुच्चत्वश्चेनगतीनामुत्पन्नेतत्रभचक्रस्यप्राक्पश्चाच्चलनवशेनतत्रस्थितरा
शीनांविषुवद्वृत्ताद्दूरासन्नत्वेयावद्भिरंशैर्भवतितेषांक्रांतिसंज्ञातत: क्रांतिवशेनयत्कर्मक्रियतेतत्सायनग्रहादिचक्र
तुंयुज्यते॥तेषामेवस्थितिरयनांशाएवयेषांमतेराशिचक्रंभचक्रादन्यस्थितंच॥तेषांमतेसाधनमेवप्रमाणं॥ना
न्यदित्यलंप्रपन्नं॥ ॥अलमतिप्रसंगेनतावत्कर्तुंप्रसंगमनुसरामः॥ ॥अथग्रहाणांस्वदेशीयकरणार्थंदेशांतरकर्म
च्यते॥ ॥रेखेति॥ ॥ग्रहस्यप्राक्पश्चिमादिगतिसारेखास्वदेशांतरेयोजनघ्नीचासौगतिश्च अभ्रगजे८०विभक्ता
लब्धंताविकलायद्देसंस्कार्याः कथं॥रेखात: प्राच्यामृणंकार्यं॥पश्चिमत: पश्चिमदेशस्थितालिप्ताधनंकार्यं
अत्राभ्रगजास्त्रिकेभूपरिधि: षष्ठांशा: स्वल्पांतरत्वात्सुगमार्थमंगीकृत:॥भूपरिधि४९६७ अस्मात्स्फुटपरि
धिन्यूनएवभवति॥तस्माच्छेषस्यागा: कृत:॥एतत्त्रैराशिकं॥भूपरिधिर्योजनैर्गतिकलालभ्यतेतदांतरयोजनैः क
तिगतिकला: भागहारेषष्ट्यांपवर्तिते आशीतिः कलालब्धाः इतिसुगमं॥अथानयनेकृतावपिनशेषत्यागेन
तरनिरासार्थंकर्मोच्यते॥ ॥अब्दाइति॥ ॥अब्दाइतिगताब्दा अहर्गणानयनेयेउक्तास्तेगजाश्वे७८स्त्रिरसैर्वि
भाजिताः संतः फलंतत्क्रमेणराशीज्ययोः ऋणंकार्यं॥गजाश्वेश्वंदस्यत्रिरसैर्जीवस्यइतिक्रमाज्ज्ञेयं॥तथाविश्वैः
खरसैर्द्वियमैः खेचरैः१३।३०।२२।७गताब्दाविभाजिताः संतोयत्फलंतत्क्रमेणपातोच्चसोम्याकुजिज्ञांविलिप्तासाधनंकुर्यात्
इतिसुगमं॥ ॥इतिश्रीभास्कराचार्यविरचितस्यब्रह्मतुल्यकरणस्यज्योतिर्विन्मर्दाल्लजश्रीपद्मनाभविरचितायांनामटीकायां
मध्यमाधिकारःसमाप्तः॥ ॥अथस्पष्टाधिकारोव्याख्यायते॥ ॥तत्रग्रहाणांमध्यमलक्षणस्यस्पष्टलक्षणमपिप्रतिपाद्यसंबो
ध्यते॥ग्रहस्यक्षेत्रात्मकनियतपूर्वगत्याद्वादशराशिभोगाभगणसंज्ञइत्युच्यते॥एवंकल्पेयावंतोद्वादशराशिभागास्तावंतोभ

गणास्तस्यसंभवति॥तत्रवर्तमानभगणस्ययावन्तिभागोराश्याद्योभुक्तःसमध्यग्रहसंज्ञइतिच्युच्यते॥एवंपूर्वरेकेपिषोढासंभवति॥
कस्मात्॥मंदशीघ्रनीचोच्चवृत्तप्रतिलोमा॥तुल्योमभ्रमणवशादेव॥तत्कथं॥तद्भगणगत्यासाम्यत्वशीघ्रात्तुत्वाद्भते:पूर्वपरसंभवः
स्यात्॥तद्वत्तभ्रमणेनेपिपूर्वापरावरोहारोहत्ववशोद्भते:मंदत्वं॥तस्याप्यूर्द्धाधःसंभवःस्यात्॥एवंचतुर्थाया अपिनीचोच्चवृत्त
स्यदक्षिणोत्तरक्रमत्वाद्दक्षिणोत्तरसंभवःस्यात्॥इतिगते:षोढःसंभवः॥तज्ज्ञानं॥मंदनीचोच्चस्थानप्रमाणगत्याद्यैर्विनाकैश्चिदपिज्ञातुं
नशक्यते॥तस्मात्तावन्मंदोनीचोच्चस्थानमुच्यते॥ ॥मंदश्चमिति॥ अर्कस्यसूर्यस्यमंदोच्चंमंदनीचोच्चंवृत्तस्यउच्चप्रदेशः॥तत्रस्थानंगजादि
भागाइतिराशिभागाद्वयंत्रीणियराशेरष्टादशोभागेवर्तते॥तथाभौमादिकानांक्रमेणोच्यते॥सदलाष्टसूर्याइति॥अष्टाविंशत्यधिकशतंशा
र्धभागानामिति॥१२८।३०भौमस्य॥तत्वाश्विनइतिशतद्वयंपंचविंशत्यधिकभागानां२२५बुधस्य॥सार्धयमाद्रिचंद्रा१७२।३०गुरोः॥
कृशे८१शुक्रस्य॥शशांकांगयमाःशनेः॥तथामतंगाग्नियमा२३८इतिवापाठः॥एवंसर्वेषांमंदनीचोच्चवृत्तानांस्थानान्युक्तानि॥चंद्र
स्यप्रागेवोक्तं॥अस्योपपत्तिर्यथा॥चंद्रविनान्येषांमंदोच्चानांभगणाःस्वल्पाः॥तस्माद्भतयोरपिस्वल्पतराः॥अतस्तानिस्वस्वभगणैःसा
ध्यस्थितिपाठसिद्धान्युक्तानि॥चंद्रोच्चगतिबहुत्वाद्ग्रहणादेवनयनं॥प्रागेवोक्तं॥एषांभगणैःसाधनंयथा॥सूर्यस्यमंदोच्चभगणाः
४८०कल्पवर्षैरेतेभगणालभ्यंतेतदाकल्पगतांबेकइत्यनुपातात्सर्वेषांस्वस्वभगणैःसिद्धानि॥एतेषामेतेषांगतयोयथावर्षैःसप्तभि
र्विकलेकार्यमंदोच्चस्यगतिः॥तथाद्वादशभिर्वर्षैर्भौमस्य॥बुधस्यदशभिर्वर्षैः॥गुरोःषड्भिश्चतुर्भिः॥शुक्रस्यपंचभिर्वर्षैः॥शनेरेकाशीतिव
र्षैरेकाविकला॥ग्रंथांतरस्थादीनांमंदोच्चान्युक्तानि॥तद्यथा॥सिद्धांतशिरोमणौशनेर्मंदोच्चभगणायुगेषवः५४तत्पक्षेमतंगाग्नियमा
इतिपाठः॥शनेर्मंदोच्चस्यकुसागरा४१भगणाः॥तत्पक्षेशशांकांगयमाउत्पद्यंतेयुगेषवोभगणाइत्यार्यभट्टसिद्धांतमतं॥तदुक्तं॥सि
द्धांतुरमीषांतथाद्वाचविराटघ्नशिष्यमंदोच्चमिति॥तथासूर्यसिद्धांते॥गोग्नयः शनिमंदस्यतत्पक्षेशनेर्मंदोच्चं७।२६।३७एतदार्यभटमतं॥अ

53
1941

सू	मं	बु	गु	शु	श
२	४	७	५	२	८
८०	८	९७	३२	२०	२७
२६	२४	५४	३४	५७	५०

थभौमादिकानांशीघ्रोच्चेन्युच्यते॥ कुकुंजराइति॥२॥ भौमस्यकुकुंजराइतिएकाशीतिः शीघ्रनीचोच्चवृत्त
व्यासार्धं वेदरुद्रानुबुधस्य त्रिदस्रागुरोः॥ सप्ताहवः शुक्रस्य विश्वमिताशनेः॥ अत्रभौमादिकानांशीघ्र
नीचोच्चवृत्तपरिधयः सिद्धांतोक्ताः॥ एषांचन्द्राः कृतनिनास्त्रिलवेनहीनाइत्यादयः॥ भौमस्यशीघ्रपरिध्यंशाः २४३।४०
बुधस्य १३२ गुरोः ३८ शुक्रस्य २५८ शनेः ४० एभ्योनुपातोयदिभगणांशापरिधेः त्रिज्याभिर्तव्यासार्धं १२० लभ्यते
तदाएषांकिमिति॥ अतएषांत्रिज्यागुणः भगणांशाभागहारः अत्रगुणकभाजकयोस्त्रिज्याभिर्तेयवर्तेभागहारस्यस्थानेत्रयोलब्धान
मात्रिभक्ताः॥ परिधयः केनभौमादिकानांकुकुंजराइत्यादीनिव्यासार्धान्युत्पन्नानि॥ एषांपरमाणिफलानिशीघ्रफलानिनीचारूपा
णिनस्मात्परमंजातुन॥ अथइत्यारभ्यनेश्वराणांगुरुभौमशनीनांमध्यमोरविरेवशीघ्रनीचोच्चवृत्तस्योच्चमंज्ञं॥ बुधशुक्रयोस्तुमध्य
गतावुच्चमितिग्रहाणांमंदनीचोच्चवृत्तानांस्थानानिव्यासार्धानिचप्रतिपाद्यार्थस्वस्वमंदशीघ्रोच्चस्थानानुग्रहश्चलितानामनुतरपरि
क्रमिमिघनिमध्यमंसचिह्नमंदशादग्रतः पृष्ठतोवासीत्येवंप्रतिपादनंश्लोकद्वयेनाह॥ ॥ग्रहोनमिति॥३॥ न्यूनमिति॥४॥ मंदोच्चचन्द्र
चंग्रहोनकुर्यात॥ ग्रहेणानंग्रहोनं॥ मंदोच्चमितिमंदोच्चंचन्द्रोच्चमितिशीघ्रोच्चं॥ यदामंदफलमानीयतेनदामंदोच्चाद्ग्रहः शोध्यते॥
यदाशीघ्रफलंतदाशीघ्रोच्चाद्ग्रहः शोध्यते॥ शेषंयदाउयाद्यवशिष्यतेतत्तेंद्रस्यमंज्ञंभवति॥ ननुशीघ्रोच्चाद्ग्रहः शोध्यतेतेद्यन्नि
मन॥ शीघ्रोच्चानांभगणाधिकत्वेनस्फुटगतित्वात्॥ एवंमंदोच्चाद्ग्रहः कथंशोध्यतेनशोध्यतेएव॥ ग्रहभगणाभ्योमंदोच्चभगणाल्पत्वात्॥
अत्रग्रहान्मंदोच्चंशोध्यतेतेद्युक्तिगतपरंतुमंदोच्चाद्ग्रहशोधनंतदयुक्तं॥ अथाचार्येणांगीकृतंकस्मात्तेंद्रस्यभगणानांप्रयोजनाभावात्॥
तथामंदशीघ्रफलानामेकोक्ताधनर्णाफलस्थित्वाच्च॥ अतोराश्यादिकस्यैवंकेंद्रस्यप्रयोजनापेक्षयामांदंयस्मनंगीकृतं॥ मंपिप्रतिपाद्यमंदो
ध्यतेग्रहस्यक्षेत्रात्मकनियतपूर्वगत्याद्वादशराशिभोगोभगणमंतइत्युच्यते॥ एवंकृत्वेयावंतोद्वादशराशिभोगाभोगास्तावंतोभगणास्तस्यमंदो

मदनुनामसमीचीनमुक्तं॥ परंसुदूर्यावृत्तितःकेंद्रशब्दस्यार्थोनज्ञायते॥ केंद्रशब्देनवृत्तमध्यमुत्पद्यतेनहिंत्यस्यकिमिति॥ अत्रग्रहस्यस्फु
टस्थानंज्ञातुंबुद्धिमद्भिराचार्यैर्गणितंदर्यंज्ञेयं॥ त्रादिवेधेनवृत्तत्रयंकल्पितंतेषांयानिमध्यचिह्नानिकेंद्रसंज्ञास्युः॥ वृत्तस्यमध्यंकिल
केंद्रमुक्तमितिवचनात्॥ प्रथमंकक्षावृत्तंतत्परिधौग्रहःसप्तमध्याच्छशिमंडलगामिस्तत्रस्थोयस्मिन्नाश्रयवर्यवेवृत्तत्रयेनतत्रस्थःखेटोज्ञे
यः॥ कक्षापरिधिस्थितमंदनीचोच्चवृत्तमध्यपरिज्ञानायमंदकेंद्रंकल्पितं॥ तस्मिन्नपिशीघ्रनीचोच्चवृत्तपरिधावास्थितस्फुटज्ञानायशी
घ्रकेंद्रंकल्पितं॥ तस्मिन्केंद्रविद्धग्रहस्थितनिभावः॥ इतिकेंद्रविज्ञायग्रहज्ञानार्थमुपायः॥ त्रिभिस्त्रिभिर्भैःपदमितिवृत्तपरिधौद्वाद
शराशीनुसावयवान्विभज्यते॥ तेषुत्रिभिस्त्रिभिःराशिभिरेकैकंपदमितिचत्वारिपदानिकल्प्यानि॥ तस्मिन्केंद्रेमेषादिषट्राशिस्थेग्र
हकर्मांशेशीघ्रंवासाध्यते॥ तद्ग्रहस्यधनमितियोज्यं॥ तुलादिषट्कत्वाच्छोध्यं॥ इतिधनर्णसंज्ञाविधायफलसाधनोपायःक्रियते॥
सर्वगणितनानेत्रराशिकप्रसिद्धं॥ उक्तंच॥ त्रैराशिकेनवसमस्तमतद्यानंस्वभेदहरिणेवविश्वं॥ यद्वृत्तपरिधिःपरिणामितस्तनःत्रैरा
शिकेसिद्धंभवति॥ अतोत्रभुजकोटिकल्पनाक्रियते॥ द्युनेभुजइति॥ ॥त्रिभिराशिभिर्यद्वृत्तंतदेवभुजःस्यात्॥ भाद्वाद्राशिकषट्कादधिकं
तद्भाद्वराशिषट्कोनंभुजःस्यात्॥ तदाधिकंतत्रुटितंभकर्मभमितिराशिद्वाशकंतद्भुजसंज्ञंस्यात्॥ एवंभुजंविधायअनेनभुजेनत्रिग्रह
भूतंभवयदवशिष्यतेतत्कोटिसंज्ञं॥ अत्रभुजकोट्योरूपपत्तिर्यथा॥ यत्रिचोच्चवृत्तंमांदशीघ्रंवाकल्पितंतत्रमध्येऽर्ध्वाधरेरेखाभूमध्या
त्क्रियतेतत्रयद्वर्धंचिह्नंतद्भुजसंज्ञं॥ यदधस्थितपरिधौचिह्नंतत्कोटिसंज्ञं॥ तत्केंद्रोपरिमत्येनतिर्यग्रेखाक्रियतेतावत्परिधौचत्वारिराशि
त्रयात्मकानिपदानिभवंति॥ तत्रोर्द्धरेखातः अग्रतः पृष्ठतोवायदंतरंसभुजः॥ तदेवग्रहस्यफलंमांदंशीघ्रंवा॥ यद्यग्रतस्तदाधनंपृष्ठत
स्तदाऋणमितिस्वस्वनीचोच्चवृत्तेज्ञेयं॥ तथातिर्यग्रेखातोयदूर्ध्वाधरमंतरंतत्कोटिसंज्ञं॥ एवंचात्रप्रथमपदेतृतीयपदावगतोभुजः॥ गम्या
कोटिः॥ तथाद्वितीयपदेचतुर्थपदेचस्थोभुजः॥ गताकोटिः॥ तथाचोक्तं॥ अयुग्मपदयातमध्यंतुयुग्मभुजोवाकुहीनंत्रिभंकोटिरुक्ता॥ भुजकोट्यो

57
1941

[illegible] ॥ अथ भौमस्य मंदोच्चविशेषः ॥ तथा शीघ्रनीचोच्चवृत्तस्य तदुच्यते ॥ भौमाश्च कंदइति ॥ ॥
[illegible] ॥ भौमस्य शीघ्रकंदमिति शीघ्रनीचोच्चवृत्तस्य परिधेरुदेशो यस्मिन्नग्रहस्तिष्ठति स प्रदेशः ॥ उच्चप्रदेशाद्यदि
[illegible] ॥ यत्र भौमस्य सद्भावः सूर्यादिति मंदोच्चमुक्तं तस्मिन्नशीघ्रकंदपदसंधौ ज्ञेयं ॥ पदमध्ये पादैनिः
[illegible] ॥ शीघ्रनीचोच्चवृत्तस्याधोर्ध्वस्थितत्वेनोर्ध्वाधस्थितेनाधिकमिति ॥ तन्मध्ये नुपातादुपचयापचयेन ज्ञेयं ॥ तज्ज्ञा
[illegible] ॥ वर्तमानपदस्य गतगम्ये पृथक् कुर्यात् ॥ तयोर्मध्ये यत्र लब्धं भुजकोटिर्मध्यइति भावः ॥ तस्य लिप्ताः कार्याः ॥ ताः खख
[illegible] ॥ अत्र सिद्धांते ग्रहाणां मंद
[illegible] ॥ भौमस्य मंदोच्चसंस्कारार्थं कर्कादारभ्य मकरादौ धनमिति ॥ तदसत्कृतं दृश्यं स्फुटं भवति ॥ अत्र सिद्धांते ग्रहाणां मंद
[illegible] ॥ अत्र सिद्धांते ग्रहाणां मंद
[illegible] ॥ भौमस्य मंदोच्चसंस्कारार्थं कर्कादारभ्य मकरादौ धनमिति ॥ तदसत्कृतं दृश्यं स्फुटं भवति

त्र्योप्रसाध्यफलसाधनमुच्यते॥ सूर्यादिकानामिति॥ ॥युगाष्टशैलैरिति॥ ॥व्याख्या॥ ॥सूर्यादिकानांग्रहाणांमृदुकेंद्रोर्ज्यैति
मंदचलकेंद्रतस्यदोर्ज्यः तद्दोर्ज्यामृदुकेंद्रदोर्ज्यादिघ्नीदशाभिर्गुण्याक्रमेणवक्ष्यमाणभागहरैर्भाज्यौ के:॥ खपंचबाणैः सूर्यस्य॥
नागाग्निदस्रैश्चंद्रस्य॥ गिरिपूर्णचंद्रैर्भौमस्येत्यादिफलंलवाः साचयवास्युः॥ इतिलवाद्यैस्त्रिस्थंफलंग्राह्यं॥ तेलवाः कलिकाद्यवयव
सहिताः केंद्रवशाद्धनर्णकार्यौ॥ प्रागुक्तलक्षणेनग्रहस्यधनर्णंकार्यं॥ एवमितरेभौमाद्या अनेनमाद्यकर्मणासंस्कृतासंतोमं
दस्फुटनामानोभवंति॥ शीघ्रनीचोच्चवृत्तानांकेंद्रस्थानज्ञापकाः स्युरितिभावः॥ अत्रोपपत्तिः॥ पूर्वैर्वदर्शिता॥ गुणकारभागहारा
णामुत्पत्तिर्यथा॥ मंदनीचोच्चपरिधयः सिद्धांतोक्ताः॥ मंदोच्चनीचपरिधिस्त्रिलवोनशक्रभागाइत्यादयः॥ १३।१४ चंद्रस्य ३९
३६ भौमस्य ७० बुधस्य ३८ गुरोः ३३ शुक्रस्य ११ शनेः ५० एभ्यः शीघ्रपरिधिवत्परमफलान्युत्पाद्यत्रैराशिकद्वयेनोत्पत्तिः स्या
त्॥ यथा॥ यदित्रिज्यायांएतत्फलमुत्पद्यतेतदेष्टजायाः किमिति॥ इष्टज्यायाः परमफलंगुणः त्रिज्याभागहारः॥ अत्रगुण
फलस्थानेत्रिस्थंफलंतद्गुरुकर्मत्वादन्योनोनुपातः॥ सर्वेषांपरमफलंदशभागानप्रकल्प्यकृतः॥ तद्यथा॥ यदिपरमफलस्यत्रिज्याभा
गहारः तदादशभिरतस्यकमुत्पद्यते॥ एतदपिबहुक्लिष्टंकर्म॥ तस्मादन्यप्रकारेणकर्मोपसंव्यवहारंकृत्वा अनेनैवत्रैराशिकेनोत्प
द्यते॥ तद्यथा॥ रवेर्यदिपरिधिः १३।४० अस्याः प्राग्भागाहारउत्पन्नाः ५५० अथानुपातः॥ यद्यस्मात्परिधेरसौभागहारस्तदेष्टग्र
हस्यपरिधिः कइति॥ अस्यपरिधिगुणः ५५० गुणितंजातं ७५१७ अस्मिन्निष्टपरिधिभक्तेतद्ग्रहस्यभागहाराउत्पद्यंते॥ एवंसर्वेषिश
क्रस्यपरिधिएकादशभागाउक्ताः॥ तद्यंकपूर्वभाज्यलब्धाः ६८३ अस्यशक्रस्यभागहारः अत्रयुगाष्टशैलाउक्ताः॥ तेतुपंचविंश
तिकलोनदशभागास्तद्वशादुत्पद्यंतेतेभक्ताः॥ यतोब्रह्मसिद्धांतेनोक्ताः॥ विषमांतेयुग्मांतेरुद्राः ११ भद्रसिद्धांतेसार्द्धादशोक्ताः॥
तस्मादत्रभागहारः पंचविंशतिकलोनदशभागदुक्तः॥ तथाराशिविशेषोयथा॥ शनेः परिधिः पूर्णषट्कः ५० तद्दशाद्भागहारः

१५० अत्रमुनिपंचचंद्राउक्ताः॥ तेतु अष्टविंशतिपरिधिवशादुत्पद्यंते॥ यतः सूर्यसिद्धांतेत्रिंशदुक्ताः॥ शिरोमणिसिद्धांतेत्रिंशत्क्रमाणिगाद
नाइतिवापाठः॥ उक्तोस्तितद्दशाद्भागहारः १५२ एतानुत्पद्यंते॥ एवमन्यत्रविचारकृतेमेषादिकेंद्रेमुनिपंचचंद्राइत्यनेनभागहारेणभवति
प्राय आकाशदृग्योग्यः स्यात्॥ तुलादिकेंद्रेशशिपंचदस्रेत्यनेनभागहारेणभवति॥ अतोमेषादिकेंद्रेत्रिंशन्मंदपरिधिः तुलादेपूर्णष
ट्कइतिसंभाव्यते॥ मंदोच्चंतुमतंगाग्नियमाइति॥ शनेर्विशेषः॥ आकाशेवेधविधिनादृक्तुल्यतादृष्टेति॥ अथपरमंदफलानिरवे
१३०।५४ चंद्रस्य ३०२ भौमस्य ६७।५४ बुधस्य ३६३।३८ गुरोः ३१७।४३ शुक्रस्य १।५० शनेः ४५८।३२ इत्यत्रग्रंथप्रकारेणोत्पन्नानि॥
एतानिदशगुणितानिषष्ट्यासवर्णीनिद्विचारंषष्ट्यागुणितयात्रिजयाभागेद्रियमाणेक्रमेणसर्वेषांखपंचबाणाद्याभागहाराउत्पद्यंत
इति॥ वेति॥ मध्यमार्कोदयिकालेस्फुटार्कोदयिकाः करणायकर्मोच्यते॥ ॥भानोः फलमिति॥ ॥इतिसूर्यस्यमंदफलंसप्तविंशति
भिर्भजेत्॥ यद्यंशाद्यंफलंसूर्यस्यभजेत्॥ तदंशाद्यंप्राप्तोतितत्फलंसूर्यवदतिसूर्यफलंधनंतदाधनंऋणंतदाऋणं॥ मध्यमेचंद्रेसं
स्कुर्यात्॥ अस्यापपत्तिः॥ मध्यमसूर्यः यस्मिन्कालेउदेतितत्कालिकाः सर्वेजाताः॥ ततः सूर्यस्यफलेनसंस्कृताः कार्याः॥ यतः सूर्य
स्यमंदफलेऋणधनेचपूर्वतः दृष्टत्वाच्चोदेतिमंदफलांशैरंतरित्वात्॥ अतोत्रानुपातः॥ यदिमंडलकलाभिः २९६०० गतिः तुल्यालभ्य
ते॥ तदासूर्यस्यफलतुल्यकलाभिः कलाभिः कइतिइतिप्राप्तं॥ फलंतदर्कवत्संस्कार्यमिति॥ चंद्रस्यगत्यानया ८०० मंडलकलाभक्ताः
फलंसप्तविंशतिः असौमंदफलस्यभागहारइति॥ अन्येषांभौमादीनांस्वल्पांतरत्वात्तेनोक्तमित्यपपन्नं॥ एवंग्रहस्यस्फुटत्वमुक्तागते
स्फुटत्वमुच्यते॥ ॥स्वभोग्यखंडमिति॥ ॥भुजज्याकरणेयद्भोग्यखंडंतत्खरांशैरितिसूर्यस्यनवहतंकार्यं॥ हिमांशोश्चंद्रस्यभोग्यखं
डत्रयोदशभिः संगुण्यचतुर्भिर्विभजेत्॥ फलंकलाद्यंद्विस्थंग्राह्यं॥ गतेः संस्कार्यस्वर्णंकलात्मकंमृगादिकेंद्रइति॥ अयंसंबंधः
मंदकेंद्रकर्कादिस्थेसंस्कार्यंमृगादिस्थेऋणमिति॥ सागतिः सूर्यचंद्रमसोः स्फुटाभवति॥ इतरेषांवक्ष्यमाणफलेनसंस्कृताः संतोमंद
स्फुटास्युरिति॥ तदुच्यते॥ कुजसौम्ययोरितिभौमबुधयोस्वभोग्यखंडंद्विघ्नंकृत्वासप्तभिर्भजेत्॥ गुरोः स्वभोग्यस्वखंडंखाक्षैर्भजेत्॥

इनः शुक्रस्य॥ खार्कमिति १२० शनेः॥ इति नीचादिकानां क्रमेणरक्षेरित्यादिभिर्भाजकैर्भजेदिति संबंधः॥ अस्यापपत्तिः॥ चंद्रादि
नाग्रहाणामध्यगतिरेवमंदकेंद्रगतिः॥ मंदोच्चगतेरल्पत्वात्॥ चंद्राच्चस्य तु मंदोच्चगतिरधिकामध्यगतिः॥ सैवकेंद्रगतिः॥ ३८४
वंसस्वगतितुल्यकलाभिर्मंदकेंद्रं प्रत्यहमुपचर्यते॥ इति॥ नीचोच्चवृत्तस्यकेंद्रमध्यमभगणेन भमंडलस्यस्वगतितुल्यकलाः प्रति
दिनं भुक्तकांतिभावः॥ एवं मतिप्रवाहक्षिप्तः सन्किंचिन्न्यूनाधिकाः संभवंतीति सास्फुटामंदकेंद्रगतिदिनयोग्यादिनमंदस्फुटयो
रंतरमित्यर्थः॥ तत्फलयोरंतरं मंदराशिफलमिति सर्वमुपपन्नं॥ एवं ग्रहाणां स्वगतीनां मंदस्फुटत्वं प्रतिपाद्य स्फुटत्वज्ञापनाय शीघ्र
फलभुजकोटिकर्णाश्चत्वारोऽस्तीति मतिप्रतिपादयन्नाह॥ ॥कोटिज्येति॥ ॥व्याख्या॥ मंदस्फुटग्रहशीघ्राच्चद्विशोध्य॥ अत्र
शोधनच्छायाकेंद्रतस्य प्राग्वद्भुजकोटीजीवे साध्ये नेच्चलकेंद्रजे कोटिजीवे भवतः॥ तयोर्मध्ययाकोटिज्यया च्चलकेंद्रजा कोटिज्या च्य
ते॥ सास्वस्यपरेण गुण्या॥ कुकुंभरेत्याद्येन सेवपुनर्द्विघ्नीकार्या॥ तया द्विघ्नया केंद्रकर्कराशादिकेसति रवाभ्यधिकशंकर्युनापरकोटिः॥
उनाभवति॥ तन्मूलं तस्य वर्गमूलं यात्यं श्रवणः स्यात्॥ सप्तथगे कोनस्थाप्य॥ प्रागानितभुजज्यासापरेण गुणिता भनेन श्रवणभजे
जित॥ फलं विस्तंगहीत्वा तस्य चापं कुर्यात्॥ विशुद्धखंडानीत्येन विधिना तद्दशादिशीघ्रफलं स्यात्॥ अत्र केंद्रकोटिज्ययोर्न तथा श्रवण
फलयोरपि संस्थानसाधनप्रक्रियाश्च॥ उपपत्तिर्यथा॥ ॥केंद्रभुजकोटिज्यानां संस्थापनोपपत्तिः प्रागेवदर्शिता॥ श्रवणोपपत्तिराचा
र्येण चतुर्थाउक्ता॥ तत्र नीचोच्चवृत्तभंग्याक्रियोपसंहारेण कृता॥ सचोच्यते॥ परमशीघ्रफलज्यासार्द्धं नलं तयछीघ्रनीचोच्चवृत्तभाग
स्यष्टकाल्ज्ञा॥ यादेव तस्य मध्येऽर्द्धाधरारेखा तथा तिर्यगपि रेखा कार्या॥ ते चत्वारि पदानि भवंति यस्तस्मिंधो परमार्थिकः स्फुटो ग्रहः स्यात्॥
ऊर्द्धाधररेखाग्रयोरंतरं भुजफलं स्यात्॥ सेवभुजज्या॥ तथा तिर्यग्रेखाग्रयोरंतरं कोटिफलं स्यात्॥ सेवकोटिज्या॥ ग्रहभ्रमध्यो नरं
कर्णः॥ इति ज्यस्मे प्रकल्प्य कोटिफलत्रिज्ययोर्योगः सकोटिः॥ भुजफलं भुजः॥ तद्वर्गयोगमूलं कर्णः॥ अत्र क्रियोपसंहारदुपन्नाक्रि
यायथा॥ अत्र कोटेः खंडद्वयं वर्तते॥ एवं कोटिफलं द्वितीयं त्रिज्या॥ अनयोर्वर्गयोगस्य वर्गः क्रियते॥ खंडद्वयस्याभिहतिर्द्विनिघ्नीत्या

दिसूत्रेण तद्यथा॥ त्रिज्याकोटिफलभावितकृद्विनिघ्नी त्रि॰ को॰ फ॰ भा॰ तत्खंडवर्गैक्ययुता जाता त्रि॰ को॰ फ॰ भा॰ १ त्रिकोफल १ असौ कोटि
वर्गो जातः॥ अथ भुजवर्गः क्रियते कोटिफलवर्गोनपरवर्गः सभुजवर्गः इति॥ तद्यथा॥ कोटिफल व १ परवर्ग १ असौ भुजवर्ग अनयो
र्योगे जाते त्रि १ को १ फ भा २ त्रिवर्ग १ परवर्ग १ कोटिफलानयने कोटिज्यापरेण गुण्या त्रिज्योद्धृता तत्कोटिफलं त्रिज्या गुण्यं तस्माद्गु
णकभाजकयोः सुल्यत्वात्त्रिज्यानाशे कृते कोटिज्यापरगुणावशिष्यते॥ सा च द्विगुणेति कृते खंडद्वयस्याभिहतिर्द्विनिघ्नीति कृता
स्यात्॥ सा मंडवर्गैक्ययुतेति त्रिज्यावर्गपरवर्गयोगे न युता सती खंडवर्गयोगे भुजफलवर्गयोगसमा जाता इति मकरादिकेंद्रे कोटि
फलस्य त्रिज्यात उपरि स्थितत्वात्॥ कर्कादिकेंद्रे अधस्थितत्वात्॥ खंडांतरवर्गभुजफलवर्गयोगे क्रियमाणे खंडद्वयस्याभिहतिर्द्विघ्नीतत
खंडवर्गैक्याच्छोध्येति तस्मात्कर्कादावृणा॥ यत इति॥ तथा चोक्तं॥ वर्गयोगस्य यद्वाद्यो वर्गस्य चांतरं॥ द्विघ्नघातसमानं स्याद्द्वयोर
व्यक्तयोर्यथा॥ वर्गयोगस्य तथांतरवर्गस्य चांतरं द्विघ्नघातसमं स्यात्॥ द्वयोरव्यक्तयोर्यथेति॥ तन्मूलं कर्ण इत्युपपन्नं॥ ॥अथोफ
लोपपत्तिः त्रैराशिकद्वयेन॥ यदि त्रिज्यया परतुल्यफलं लभ्यते॥ तदा भुजज्यया किमिति॥ ततो न्योनुपातः॥ यदि कर्णहतेष्टतत्फलं दृष्टं
त्रिज्याहतेन किमिति॥ गुणकभाजकयोः सुल्यत्वात्त्रिज्यानाशे कृते दृष्टभुजज्यायाः परो गुणः कर्णो भागहारश्चेत्युपपन्नं॥ भमंडलस्य यासा
सार्द्धं त्रिज्यातुल्यमिति आद्यः कस्मिंस्तस्मिन्नृतुनजीवारूपी भमंडलक्षेत्रं शरकरणा यतस्य चापं क्रियत इत्युपपन्नं॥ एवं संस्कृतो
ग्रहः स्फुटः स्यात्॥ पुनरस्याप्यतिस्फुटत्वज्ञानार्थं कर्मोच्यते॥ पूर्वार्धेन॥ उनरार्द्धेन भौमस्य विशेष उच्यते॥ ॥तदुभमंदेति॥ ॥यः स्फु
टो जातः तस्मादुत्थं तदुत्थं॥ तेन चलेन चेद्यदि मध्यमं संस्क्रियते॥ तदा सोऽस्पष्टतरः स्यात्॥ एतदुक्तं भवति॥ यः स्पष्टः कृतः सएवम
ध्यमकृतपरिकल्प्यः तस्मात्प्रागुक्तप्रकारेण मंदफलं संसाध्य मध्यमे संस्कार्यं तस्मान्मंदस्फुटात्पुनः प्राग्वत्चलफलं साध्य तस्मिन्ने
व मंदस्फुटे संस्कुर्यात्॥ सस्पष्टतर इति अतीव स्पष्टस्यादिति॥ भौमस्य विशेषः॥ प्रथमं मंदफलेन दलीकृतेन नीचोच्चेण दलीकृतेन च एवं दली
कृताभ्यां प्रथमं फलाभ्यां न तोखिलाभ्यां यथागताभ्यामिति॥ यस्तु दलीकृताभ्यां संस्कृतं तस्मान्मंदस्फुटं सफलं मध्यमे संस्कुर्यात्॥ तस्मा

क्षेप्यं संसाध्यतस्मिन्नेवमकलं संस्कुर्यात्॥ इति पुनर्दत्तोक्तनाभ्यां कथमंकलाभ्यां ततो विलाभ्यामित्यसंस्कृत॥ यावदविशेषः॥ स्यान्नाव
दिति॥ सभोमः सप्तनरस्यादिति॥ अथवासनाप्रागेव॥ तथापि किमपि यासनात्रोच्यते॥ स्फुटग्रहाधिष्ठितमंदप्रतिमंडलकेंद्रं यस्मिन्स
चक्रराशावयवेवर्तते॥ सप्तमंदस्फुटोज्ञेयः॥ तस्मात्तत्रशीघ्रफलमानीयसप्तमसंस्क्रियते॥ तस्मान्मध्यमंस्फुटं परिकल्प्य शीघ्रफलं प्रथमं
साधितं तत्संस्कृतः स्फुटो भवति॥ इत्यतो मंदफलमानीयमध्यमः संस्कृतः ततो संस्कृतकर्मकर्तुं युज्यते सप्तमोमस्यावश्यमेव कर्तव्यं
शीघ्रप्रतिमंडलस्य स्थूलत्वात्प्रतिक्षणमन्यादृक्त्वाच्च॥ अन्यद्वारं संस्कृताएवाशिषाः स्युः शीघ्रप्रतिमंडलस्य समीचीनत्वादिति॥
अथ गतेः स्फुटत्वसाधनप्रक्रियोच्यते॥ द्वाक्रेंद्रभुक्तिरिति॥ यदिति॥ ॥व्याख्या॥ ॥द्वाक्रेंद्रमिति शीघ्रकेंद्रस्य भुक्तिरिति मंदस्फुटा
भुक्तिः शीघ्रोच्चभुक्तेः शोधयेत्॥ शेषं द्वाक्रेंद्रभुक्तिर्भवति॥ आशुचापभोग्यजयया गुण्या इति॥ शीघ्रफलस्य चापकरणे यदशुद्धं खं
दं तेन गुणा पुनः खाधिगुणाः कार्याः॥ समघ्नकर्णेन भाज्या॥ यत्फलं प्राप्यते फलाद्यंतच्छीघ्रोच्चगतेः शोध्यं॥ शेषं स्फुटा गतिः स्यात्॥
संशोध्यमानं समगणत्वमेतिवचनात्॥ ॥अत्रोपपत्तिः॥ ॥कक्षायोदिनद्वयोत्पादितमध्यकेंद्रशीघ्रकेंद्रांतरं सा शीघ्रकेंद्रस्य स्फुट
गतिसाधनार्थं त्रैराशिकत्रयोपसंहारेण द्वावेकगुणा भाजकोत्पादनार्थं आद्यखंडयोस्तुल्यखंडकयोश्च गुणकभाजकयोस्तुल्यत्वात्
द्वाक्लत्वानिष्टाद्याचार्येणैकोसमिहांतेगुणकभाजकौ यथा॥ फलं शशांकांतरमिंत्रिनीघ्नी द्वाक्रेंद्रभुक्तिश्च तिथादिनि॥ शीघ्रफलं
मानांकोटिज्यां विधाय आद्यखंडकेन संगुण्य त्रिज्यया लब्धेन तदाशुफलचापभोग्यखंडं स्फुटं भवति॥ अतो त्रैराशिकचापभोग्यखंड
केन गुणितं त्यक्तं॥ स्वसांतरत्वात्स्फुटफलमनुकूलेनांगीकृतं॥ ततो नुपातः॥ आद्यखंडेनानेन २९ इयं शीघ्रकेंद्रगतिर्लभ्यते॥ तद्
भोग्यखंडकेन कतिलब्धा स्फुटागतिः॥ ततो नुपातः॥ यदि कर्णश्चेदियं गतिस्तदा त्रिज्यायां चेत्किमिति केंद्रगतिः स्फुटा भा॥ इत्यनुपा
तद्वयेन॥ अतो द्वाक्रेंद्रभुक्तेः भोग्यखंडं त्रिज्यां च द्वौ गुणकौ प्राप्तौ॥ तद्यथा॥ खंडं २९ कर्णश्च द्वौ भाजकौ तत्र त्रिज्यागुणस्य आद्यखंड

63
1941

स्य भाजकस्य त्रिभिरपवर्तः कृतः॥ त्रिज्यास्थाने चत्वारिंशदाद्यखंडकस्थाने सप्त॥ उभयोर्भाजकयोर्द्वाभ्यां सप्तघ्नकर्णाज्जातइति॥ अत
उक्तं सप्तघ्नकर्णेनेत्यपपन्नं॥ एवं ग्रहागतयश्च स्फुटाः साधिताः॥ ते च मध्यमसाधनोदयिकाउन्मंडलस्थाएव॥ ते भोग्यखंडं त्रिज्याच
द्वौ गुणकौ प्राप्तौ ततस्तेसावनोदयिकाक्षितिजस्थाः कर्तुं युज्यंते॥ अन्यथास्वविषयस्थाः कथं स्युः॥ तत्कर्मेरणायकर्मद्वयमुक्तं॥
तदयनांशसिद्धं॥ तदयनांशसाधनप्रक्रियोच्यते॥ अथेति॥ ॥ये करणाद्वाल्लाएवलिप्ताः॥ ताभिर्भवायुक्ताः एते अयनांशाः स्युः
करणाद्वतुल्यलिप्ताभिर्युक्ताश्चेत्तेभवाश्च॥ ते अयनांशा अधस्थास्तदवयवाएभिरंशैः सावयवैरयनं चालतीति॥ अनाख्यांशा उच्य
ते॥ एषामुपपत्तिरुपलब्धिरेव॥ तत्कथं॥ यस्मिन्यावंतोधनगताक्षणगताबालभ्यंते तदा तएव द्विधा ज्ञेयाः॥ कस्माल्लभ्यंत इत्युच्य
ते॥ उदृष्टदिनमध्यान्स्फुटयंत्रवेधेनोन्नतांशात्सावयवात्प्रसाध्यनवतेर्विशोध्य शेषांशाक्षांशयोरेकान्यदिशोरंतरं योगं विधायते
भ्यः क्रांतिखंडकैश्चापं कुर्यात्तमर्यस्य भुजः स्यात्॥ ता॥ कालिकोगणितागतोर्कोपि स्फुटः साध्यः तद्भुजप्राग्भुजयोर्यदंतरं तदयनांशाः
सावयवास्तेषामयनांशाः॥ तथा चोक्तं सूर्यसिद्धांते॥ साक्षार्कनतभागानादिकसाम्येनरमन्यथा॥ दिग्भेदे पक्रमः शोधे भस्य ज्यात्रिज्ययाहता॥
परमापक्रमज्याप्ता चापं मेषादिगो रविः॥ कर्कादौ शोध्यचक्रार्धात्तुलादौ सार्धसंयुतः॥ मृगादौ शोध्यभगणान्मध्यमार्कस्फुटो भवेत्॥ एवं
मध्यमार्कगणितागतस्फुटार्कयोरंतरं तदयनांशाः यदि मध्यमादिमध्याद्भुजाधिकोगणितात्तदा तेधनाख्याः॥ ऊनस्तदा ऋणाख्याएव॥
अनयोरपरस्थिरेवासंनत्यक्तं॥ एषां प्रतिवर्षमेकैकाकला अधिकोत्पद्यते॥ यत आचार्येणकर्णाद्वलिप्ताभिर्युक्ताइत्युक्तं ग्रंथारंभे
एकादशोनायनांशा आसनांतस्माद्युक्ताभावाइत्युक्तं॥ अन्येस्तु चतुःपंचाशद्विकलाभिः प्रतिवर्षमुपचीयंते॥ अस्योपपत्तिः॥ प्रागेवो
क्ता॥ तत्रापि गणितागतविशेषादत्राप्युक्तइत्युक्तं॥ सार्द्धैश्चतुर्दशागतवर्षैः परमायनलवस्य व्यावृत्तिर्भवति॥ यस्मिन्नयस्मिन्पक्षे क
लोपचयस्तदन्येचतुर्विंशत्यंशाः परमायनचलनांशाः यस्मिन्पक्षे चतुःपंचाशद्विकलाउपचीयंते॥ तत्पक्षे सप्तविंशत्यंशाः परमा

उत्पद्यते॥ एवमेषां चयापचयवशात्तद्भागपरत्ववशाद्दर्शसंभवस्थादिति॥ एषां संस्थानोपनिष्पन्नत्वामनाप्रत्यक्षोपलब्धिरिति सनयं
त्रकिरणावलीगोलयंत्राध्यायेस्फुटोक्तः॥ एवमयनांशानुत्पाद्यमध्यमसावनस्यस्फुटत्वकरणमुच्यते॥ ॥द्विघ्नस्येति॥ ॥व्याख्या॥ ॥
तद्यथा॥ मध्यभानोरिति॥ पूर्वसंबंधः॥ मध्यसूर्यं अयनांशैर्युक्तः कार्यः तस्य द्विघ्नस्य दोर्ज्यामात्ररूपकार्या॥ यद्विकलात्मकं फलं तद्यु
ग्मपदेस्वं॥ ओजपदे ऋणं कार्यं॥ इत्युदयांतरास्यं कर्म॥ सूर्याचंद्रमसोरेव॥ नान्येषां॥ अन्येषां स्वल्पांतरत्वान्नोक्तं॥ अस्योपपत्तिः
क्रांतिमंडलाग्रेराशौ सेत्रारव्याः सर्वे तुल्याएवेति त्रिज्यामध्यमसावनाविषुवन्मंडलेयेराशयः तेकलारव्याः तेषां निरक्षस्फु
टसावनत्वकरणाय उदयांतरकर्मेदं प्राप्तं॥ तद्यथा॥ सायनसूर्यस्य निरक्षोदयैर्यल्लब्धाद्यं भुक्तं॥ तथा क्षेत्रात्मकवशाद्यद्भु
क्तं॥ तयोरंतरकलात्मा उदयांतरइति कृतेयदोभयोः साम्येनदाफलाभावः॥ एतौ चापचयापचयौ जीवाखंडवज्ज्ञेयः॥ एत
त्परिधावस्थितत्वात्पदमेदे त्रिज्याफललब्धे पदार्द्धद्विगुणेकृतेराशित्रयं॥ भुजः स्यात्॥ तस्माद्विघ्नस्य दोर्ज्येत्युक्तं॥ अ
नेनग्रहगतिगुण्यापक्षाभाज्याफलं विकलाः॥ तत्रैवेश्वतुर्विंशतिविकलाश्चंद्रस्य विकलानां चत्वारिंशदधिकात्रिशती
३४० अनयोस्त्रिज्यायाश्चफलसाधनेष्टेनापवर्त्ते कृते रवेः पंचभाजकः त्रिज्यायाः फलं विकलाउत्पन्ना चंद्रस्यैकविंशतिभा
जकेनकलाउत्पन्ना इत्युपपन्नं॥ तथानुपातोनवा॥ यदि रविगतेः पंचभाजकउत्पद्यते तदा चंद्रगतेवा॥ अष्टशतीतुल्यायाविं
शतिचयस्त्रैराशिकं कृत्वा सूर्यगतिः पंचभिर्गुणितापुनः॥ षष्ट्यासंगुण्य अष्टशत्याभागोहृतः॥ लब्धा एकविंशतिश्चंद्रस्य भा
गहारः॥ षष्ट्यागुणितत्वादत्रफलं कलाद्यमित्युपपन्नं॥ इत्युदयांतरास्यं कर्म॥ अस्मिन्कृते स्फुटसावनोदयिकाभवंतीति॥ अह
र्गणोमध्यमसावनेनकृतश्चलत्वात्स्फुटसावनस्थितिः॥ अथोन्मंडलस्थानं क्षितिजस्तत्करणायचक्रमोक्तं॥ दक्षप्रभासाध्यंतस्माद
क्षप्रभांप्रसाध्य चरकर्म प्राच्यते॥ ॥अयनलवदिनेरिति॥ ॥चरपलगतिघातइति॥ ॥व्याख्या॥ ॥ अथनांशासद्विचत्वारिंशदंशे

नहीनाः क्रियंतेतेयनदिनास्युः॥ तत्रार्थं॥ सूर्यस्यमेषादौगतिः ५८।३५ अयनांशानुसंगुण्यषष्ट्याविभज्यलब्धं॥ तेनदिनानत्रापि
वर्तेकृत्वाः यनांशानांद्विचत्वारिंशन्मांशाषष्ट्यवपात्यते यनदिनास्युः॥ तैर्दिनैर्मेषसंक्रांतिकालात्पूर्वयोदिवसस्तस्मिन्दिने
मध्याह्नादारभ्यांगुलशंकोर्या अंगुलात्मकाप्रभासाविषुवत्प्रभेत्युच्यते॥ तस्मिन्दिने सूर्यः सायनांशामेषादिस्थो भवति
तस्माद्विषुवद्वृत्तस्थेव्रजति अतो विषुवतीतिभावः॥ सात्रिधासंस्थाप्यादशगजदशा १०।८।१० निष्प्राक्रमेणकृत्वा अंत्यात्रि
भिर्भाज्यानिभुजस्य प्रतिराशिजानिचरखंडानिस्युः॥ अस्योपपत्तिः॥ एकांगुलस्यविषुवत्प्रभांप्रकल्प्यक्रांतिज्याविषुद्भाग्रे
ज्यादिकरणेनसूर्यमिष्टांनोक्तेनप्रतिराशित्रयस्य चरणानिसाध्यंते॥ नान्येवंविधा न्युत्पाद्यंते॥ १०।८।३३० नैःसहानुपातः॥
यद्येकांगुलमितायाअक्षप्रभायाएतावन्मितानिचरखंडानितदेष्टयाक्षभायाः कियन्मितानि॥ एवमक्षभात्रिस्थाभिः पृथ
ग्गुणिताभूपेणहृतासतीइष्टचरखंडकानिभवंति॥ अत्रैतत्त्रैराशिकं सुखार्थमंगीकृतं॥ अप्राप्तावपिप्राप्तिः कृता॥ इत्यक्षे
त्रियस्त्रिज्याश्रितेनत्रैराशिकेनसिद्ध्यति वर्गात्मकत्वात्॥ तदुक्तमाचार्येण॥ वर्गेवर्गपदंघनेघनपदं संत्यज्यपद्भ्यतेनत्रैरा
शिकमेवेति॥ अत्रस्ववचनविरोधः॥ शंकेवेत्युच्यते॥ नकैश्चिदपि॥ यदाचार्यैः श्रीमद्भिरंगीकृतं तदुष्टमप्यदुष्टं॥ यावद
ष्टांगुलाक्षभाताचदंतरंनास्तीति तत्परतः सांतराणिभवंतीतिधामद्भिर्विस्मार्यं॥ एवंचरखंडानिप्रसाध्य चरसाधनं क्रियते॥
तद्यथा॥ अयनांशाढ्यभानोरिति॥ अयनांशाढ्यस्यस्फुटभानोरिति॥ अयनांशाढ्यस्यस्फुटभानोर्भुजराशिमितखंडयोगः
स्वभाग्यसंख्याघातात्त्रिगुणलवयुक्तार्धः॥ तानिचरपलानिभवंति॥ तानिगोलयोरुत्तरदक्षिणयोः अस्वस्वसंज्ञानिभवंति॥ ए
तदुक्तंभवति॥ स्फुटसूर्यसायनांशानुसंस्कार्यतस्यभुजः कार्यः॥ तस्मिन्भुजेयावंतोराशयस्तावंतिचरखंडानिएकत्रसंयो
ज्यभाग्यखंडेनतेषांशानुसंगुण्यत्रिंशद्भिर्भागोहार्यः॥ तत्फलंपूर्वखंडकयोगेसंयोज्यतच्चरसंज्ञंभवति॥ तत्सूर्यैउत्तरगोल

स्थेऽक्षणे दक्षिणगोलस्थेधनं ज्ञेयं॥ उन्मंडलस्य क्षितिजाद्दृङ्नतिर्गोलस्थलक्षणे अग्रे कथयिष्ये॥ एवं चरसंसाध्यग्रहगतिगुण्यापवर्त्ति
भिर्भाज्यलब्धाविलिप्ताग्रहसंस्कार्यपूर्वलक्षणेन॥ तद्यथा॥ रवेरुदयकालग्रहे यथागताः संस्कार्याः सूर्यास्तकालेग्रहाद्यस्मात्कार्यः
अस्योपपत्तिः॥ उन्मंडलस्थोदयकालिकोग्रहः क्षितिजस्थार्कोदयकालिकः क्रियते॥ यथा नरगोलार्द्धे उन्मंडलक्षितिजाद्दृङ्
स्थं चरकालांतरितं निष्पन्नं॥ दक्षिणार्द्धोधस्थोऽनरार्द्धे क्षितिजस्थं भूत्वा न तु उन्मंडलमागच्छति॥ तस्मादृणं॥ अस्तकालेऽप्यस्त
मित्युपपन्नं॥ अस्यकिमपि विशेषांतरमुच्यते॥ औदयिकेऽयनर्णं यथागतं कुर्यात्॥ अस्तेऽप्यस्तं कुर्यात्॥ मध्याह्नः मध्यरात्रश्च
चरसंस्कारभावाः॥ दक्षिणोत्तरदृग्नतस्यैकत्वादिनगतं॥ परंतु ग्रहाणां चतुर्णां स्थानानां व्यवधानस्थितेर्ग्रहकिं कार्यमित्युच्यते॥
औदयिकाद्दृङ्मिश्रान्यूनतस्य मध्याह्नाच्चास्माद्दृग्त्रेयासर्वत्र तद्व्यवधानस्थितेने॥ औदयिकवज्ज्ञेयं॥ गत्यर्द्धं दत्वा अस्तकालिक
कार्यः॥ तस्माद्दृङ्मिश्रास्थितस्य व्यस्तमेव ज्ञेयं ग्रंथाविस्तरभयाद्दासनामात्रमुक्तं॥ एवं चंद्रार्कौ स्फुटौ कृत्वा तिथ्यानयनमुच्यते॥
विरविचंद्रलवादिति॥ ॥ ग्रहकलादिति॥ ॥ व्याख्या॥ ॥ विगतो रविर्यस्मादिति विरविः॥ स चासौ चंद्रश्चेति विरविचंद्रः॥ तस्य लवाः
पृथक् द्विधा स्थाप्याः॥ एकत्र रवि १२ भिरन्यत्र षष्टिः ६० हताः संतो गतास्तिथयो भवंति॥ करणानि च हतानि स्युः॥ किं लक्षणा
निष्कुरहितानि ववात॥ असितभूतदलादिशकुनिप्रभृतिचतुष्टयं भवति॥ एतदुक्तं भवति॥ स्फुटचंद्रमध्ये रविं विशोध्य यदि
न शुध्यति तदा द्वादशराशीन्प्रक्षिप्य शोधयेत्॥ यदा उभयोर्द्वयं निष्पन्नं तस्य लवाः कार्याः॥ राशयस्त्रिंशद्भिः संगुण्य लवान्
संयोज्य तेन भागाद्विधा स्थाप्याः॥ एकत्र द्वादशभिर्भाज्याः फलं गताः प्रतिपदादयस्युः॥ अन्यत्र षष्टिभागो गृहीतः॥ फलमेकं
तद्धीनं कृत्वा तानि ववादिकरणानि भवंति॥ कृष्णे च चतुर्दश्यादिदलार्द्धे शकुनिप्रभृतिचतुष्टयं भवति॥ चतुर्दश्यामेकमर्द्धं अमायां
द्वे अर्द्धे शुक्लप्रतिपदः प्रथमार्द्धमिति॥ अर्द्धे चतुष्टयं पुनः शकुन्यादि चतुष्टयं स्यादिति भावः॥ भोग्यहतेषु दवशिष्यते न तु यावद्यत्रिस्थं

67
1941

वर्तमानस्य गतं ज्ञेयं॥ तद्यदि स्वभागहारार्द्धं शोध्यते तस्यैषमिति अनुक्तवज्ज्ञेयं॥ इति सर्वत्र॥ अथ नक्षत्रयोगानयनं॥ ग्रहाद
स्वादिति॥ चंद्रकलाः भागान्यस्यां संगुण्य कलाः क्षिप्यंते॥ ताः कलाश्चंद्रस्यैव नान्यस्यापि॥ इष्टग्रहः कस्मिन्नक्षत्रे वर्तत इति ज्ञाना
यतस्यापि कलाः कार्याः॥ ताः स्वस्वगंजैर्विभाज्याः लब्धा भयागमिनीस्तः॥ क्रमादिति यत्र चंद्रकलाभक्तात्तत्र भमिति॥ यत्र चंद्र
र्कयोगकलायोगमिति॥ तेगते अनुभक्तमपि ज्ञेयं तयोर्गतगम्यातिथिवत्प्राग्वत्॥ अत्र कलाद्येतेषां गतगम्यानां विकलाः कृत्वा
स्वस्वगत्याभाज्याः फलं तेषां गतागतनाड्यो भवंति॥ वर्तमानस्येति॥ अत्रोपपत्तिः॥ यथा भमंडलांशे ३६० स्त्रिंशत्तिथय अत
स्त्रिंशता द्वादशलब्धं तस्माद्द्वादशभिरंशैरेकैका तिथिः॥ उक्तं च॥ अर्कादिनिस्तेप्राचीं यद्यान्यदृग्रहः शशी॥ तच्चंद्रमान
मिवांशैर्ज्ञेया द्वादशभिस्तिथिरिति॥ तथा भमंडलकलाभिस्सप्तविंशतिनक्षत्राणि तस्मात्सप्तविंशतिभागेष्टशतीलभ्यते
अतोष्टशतकलाभिरेकैकमृक्षं॥ योगश्चेति॥ सुगमेषवासना॥ तेषां वर्तमानानां गतेष्ययोगविलिप्तानां स्वस्वगतिकलाभि
र्भागेहृते गतेष्यभागस्य नाड्यो भवंतीति॥ इयमपि सुगमा वासना॥ एवमन्यस्यापि ग्रहस्य नक्षत्राद्यवस्थितिः साध्याः॥ ॥ इति
श्रीभास्कराचार्यविरचितस्य ब्रह्मतुल्यस्य नार्मदाख्यजपद्मनाभविरचितायां नार्मदटीकायां स्पष्टाधिकारो द्वितीयः॥ ॥ ॥ श्री
अथ त्रिप्रश्नाध्यायो व्याख्यायते॥ ॥ त्रिभिः प्रश्नैः प्रश्नकथनं यस्मिन्स त्रिप्रश्नः॥ केते त्रिप्रकाराः दिग्देशकालाः प्रश्नश्च दृष्टश्च
यासमयाद्यास्तेषां परिज्ञानमिति॥ दिग्देशादिभिरिष्टसमयादिक्रमवद्बुध्यते तदुच्यते॥ तत्र नाक्षत्राणां भमंडलस्थानमुदयप्रमा
णान्युच्यंते॥ ॥ लंकोदयादिति॥ ॥ मेषादिषण्णामिति॥ व्याख्या॥ ॥ लंकायामुदयालंकोदयाः॥ नागतुरंगदस्राः २७० मेषस्योद
यप्रमाणं भवति पलानि तावद्भिः पलैरुदेतीति भावः॥ मीनाश्विनौ २२९ वृषस्य रामरदा ३२३ मिथुनस्य॥ एते क्रमस्थाः पुनरुत्क्रमस्था
इति रामरदाः कर्कस्य॥ मीनाश्विनः सिंहस्य॥ नागतुरंगदस्राः कन्यायाः॥ एते पलैः क्रमादेतिमेषाद्याः षड्राशयउत्पद्यंति॥ तएव

सरदशांशैश्चरखंडैः सैरिनिमसमराशिजैः क्रमोत्क्रमस्थैर्विहीनउक्ताः सेनः सदेशजामेषादिषण्णामुदया भवंति॥ अर्माण्यनुलोमादिनो
विलोमसंस्थाभ्युदिनि॥ तुल्यादीनोज्ञेयाः॥ अस्योपपत्तिः॥ क्रांतिवृत्तेक्षेत्रविभागेनद्वादशराशयतुल्याएव भवंति॥ नाडीवृत्ते कालांशाविभा
गेनसर्वराशयउदयंति॥ निरक्षेतन्नाडीवृत्तंसमंपूर्वापरसमंडलवद्भवति॥ क्रांतिमंडलंचदक्षिणोत्तरतस्तीरश्चीनमुदेतिक्रांति
वृत्तस्थोमेषोयावत्तीरश्चीनत्वेनोदेतिनावद्दिषुवद्वृत्ते अस्तविंशतिभागाः किंचिन्मृगाएवोद्भवंतिएवंमेषेपिज्ञेयाः॥ क्रांतिवृत्तेयउद
ग्भवास्तेनिरक्षोदयेभ्योन्यूनोदयाग्रदक्षिणाभिमुखास्ते अधिकोदयाः॥ माक्षास्तेएवसस्वचरपलैरंतरितादृश्यंते॥ मकरादिषड्भा
कर्कादिषडधिकाएव॥ अनउक्तं॥ क्रमोत्क्रमस्थाइत्यपपन्नं॥ चरस्यसंस्थामागेवदर्शिता॥ तथाचोक्तंसिद्धांते॥ मेषादिमिथुनांतोना
डीभिस्तिथिभिर्नाभिरुदयः॥ लग्नंतुकुंभेनदस्थेप्रथमंनाभिश्चरोनाभिः॥ कन्यांतादनुषांतस्तिथिभिर्नाडीभिरुदयः॥ लग्नंतुचो
ढ्यस्थेपश्चान्नाभिश्चराद्भाभिरिति॥ रांशोदयप्रमाणमुक्तंलग्नसाधनमाह॥ ॥ नालिकाभिरुदयइति॥ ॥ नदयनइति॥ ॥ यस्मिन्नहनि
उदयघटीनांलग्नंसाध्यते॥ तद्दिनसंबंधा क्रांतिकंसूर्यसायनांशास्तत्वानस्यभागाद्यंत्रिंशद्भाः शोध्यमिनिभोग्यंकृत्वाभोग्यभागैः स्वोद
यगुण्यः॥ यस्मिन्दिनेराशोसूर्यस्यराशेस्तोदयेनगुणोयदिति॥ स्वाग्र्यस्थानायद्भ्यतेनदृनेभोग्यमित्युच्यते॥ तद्दिष्टघटीनांपलेभ्यो
विशोधयेत्॥ तच्छेषानदयस्तुराशयुदयः यावंतः शुध्यंतिनावंतोपिशोधयेत्॥ तच्छेषंस्वाग्रियुणंकृत्वा अग्रोदयेनभजेत्॥ फल
मंशाद्यंत्रिंशद्भाज्यं॥ ननक्षत्रराशोः पूर्वंयावंतोमेषाद्याराशयः सप्तमंस्वामूर्द्धियुक्तंसप्तलग्नंराशयादिरवयवसंज्ञंस्यात्॥ ननोयवनोग्राही
नेकुर्यात्॥ अस्योपपत्तिः सुगमत्वमिदं॥ अथात्रापिविशेषमाह॥ ॥ भोग्यास्यकालइति॥ भोग्यादस्यकालभोग्यास्यकालतस्मिन्
भोग्यास्यकालेएतद्दुःखंभवति॥ यदिष्टपलेभ्योंकस्यभोग्यंनशुध्यतिनदानीमिष्टकालेस्वगुणहतेत्रिंशद्विगुणितेसतिनस्यात्॥
सीयेनउदयेनाप्तंनद्युनोकालोभवति॥ अथलग्नादिष्टकालानयनमुच्यते॥ अर्कस्येति॥ स्वादिष्टकालइति॥ ॥ सूर्यस्यप्राग्वद्रो

69
1941

ग्यंसाध्यलग्नभुक्तंप्रसाध्यतयोर्योगोमध्योदयेराश्यः समयोपिलग्नाद्भवति॥ यदिलग्नार्कोवपिसायनौष्टराशिस्थौभवतस्तदोतरंभा
गाद्यंतेनदुदयोगुण्यः स्वाग्रिभिर्भाज्यः यल्लब्धंतदिष्टकालः स्यात्॥ सूर्याद्यदिलग्नमनंभवतितदाद्युराशादिनिष्टकाभ्योविशोध्यः॥
समसंयोदयात्तात्कालिकइतिगतघटिकाभवंतीति॥ अथवारजन्याः शोध्यइतिरात्रिमानाच्छोध्यः॥ समसंयोदयात्तात्कालइतिरात्रेर्गत
घटिकाज्ञेयाः॥ यदिरात्रेरिष्टकालात्लग्नंसाध्यतेतदासषड्भः कार्यः॥ तस्मात्लग्नंसाध्यंइष्टकालेपिसषड्भार्काच्चसाधनीयइति॥ ल
ग्नेनथेष्टकालेपिप्राक्षितिजातएवसाध्यते॥ सूर्यस्तुयदासुपयातितदापड्भार्कसदृशंप्राक्षितिजेलग्नंभवति॥ तस्माद्रात्रेरिष्ट
कालेसूर्यः सषड्भः क्रियते॥ तदेवसूर्यपरिकल्प्यदिनावदिष्टकालेलग्नंसाध्यते॥ इतिसषड्भार्कोपपत्तिः॥ उक्तंच॥ उदेतिराशिः स
मयेनयेनतत्सप्तमोलंसमुपैतितेन॥ अतः प्रागपरक्षितिजयोः षड्भात्रयेनरसंदेवभवतीति॥ अथदिनरात्रिमानसाधनमाह॥
चरपलयुतहीनाइति॥ ॥ पंचचंद्रानाड्यः द्विधाचरपलैर्युतहीनाः कार्याः॥ एकत्रयुताअन्यत्रहीनाः॥ तद्यद्दलंनिशार्द्धंचभवति॥
यत्रयुतास्तद्युद्दलं॥ यत्रहीनास्तद्रात्रिदलं॥ एतदुत्तरगोले॥ मेषादिषट्कराशिस्थितेर्कइत्यर्थः॥ याम्यगोलेतुलादिषड्राशिस्थिते
विलोमेति॥ यत्रहीनास्तत्रदिनार्द्धंयत्रयुतास्तत्रराज्यर्द्धमित्यर्थः॥ अस्योपपत्तिः॥ निरक्षदेशेअहोरात्रवृत्तेउन्मंडलाद्याम्योत्त
रवृत्तसंपातंयावत्सर्वदैवपंचघटिकाभवंतिक्षितिजोन्मंडलयोरभेदात्॥ तथाप्रवाहाक्षिप्तभचक्रस्यसमपूर्वापरभ्रमणत्वात्
क्षितुक्षितिजोन्मंडलयोर्भेदत्वात्॥ तद्दिनरात्रीरूनाधिकाः पंचदशघटिकाः संभवंति॥ उन्मंडलक्षितिजयोरंतरंतत्रोनाधिकाः॥
उक्तंच॥ उन्मंडलस्यावनयोंतराले सूरात्रवृत्तेचरखंडकालः॥ उत्तरगोलेउन्मंडलंक्षितिजादूर्ध्वस्थितंतस्माच्चरणपंचदशघटिका
युताः क्रियंते॥ तद्दिनार्धंयाम्येतुउन्मंडलादूर्ध्वस्थितंतस्माद्दिनार्धदलंस्यात्॥ क्षितिज्याद्याम्योत्तरवृत्तंयावत्अहोरात्रवृत्तेया
वत्योधोनाड्यस्तावद्राज्यर्धंच॥ द्युदलघटीनामिति॥ ॥ द्युदलगतघटीनांयदंतरंतत्तनसंज्ञंस्यात्॥ अत्रास्मिन्कालसाधनादिषु
एवंतत्॥ नान्यत्रजातकेन्यथेवमिति॥ अस्योपपत्तिः॥ सुगमा॥ यामोत्तरवृत्तात्याभिर्घटीभिरुन्नतः सउन्नतकालः॥ अत्रतत्

चनकालयोः पूर्वापरकपालभेदेनोक्तः॥ स अवलम्बज्ञेयः॥ पूर्वकपालस्थेसूर्ये पूर्वेनतोन्नते॥ पश्चिमस्थेपश्चिमेवज्ञेयेइति॥ अथेष्टका
लाच्छायाकर्णानयनमाह॥ ॥ दिनदलमिति॥ अथनतमिति॥ दशाहतमिति॥ ॥ दिनदलंविशारंविगताःशराःपंचयस्मात्तद्दिनदलंपंचभि
रुतंसत्वरखहरसंज्ञःस्यात्॥ सएकांतेस्वपर्नाथाः॥ ततोनतनतकृतिःकार्या॥ सापिपृथक्स्थाप्या॥ सानतकृतिरन्यशराहतापंचाशा
द्विर्गुण्यास्वरखनवाग्नि९०० याएथक्स्थितयाहता॥ तत्कृत्यानवशताढ्ययाभजेत॥ यत्फलंतत्खहरसंज्ञितंसदिष्टहरःस्यात्॥
एवंकृतेनतोत्क्रमज्योनःहरोयथाभवति॥ तथास्यात्सहरोज्ञेयः॥ अस्योपपत्तिः॥ मध्याङ्गकर्णानयनेयोहरःसअंत्यासंज्ञः॥ अत्रक
मंदाघचापार्थंत्रिज्याप्रमाणंद्वादशभिरपवर्त्यदशत्रिज्याप्रमाणंकल्पितं॥ तस्माच्चरज्यापिद्वादशाद्वादशभिरपवर्त्यते॥ तत्रघटिकैकया
एकाएवज्ञीवाभवति॥ पंचघटीयावत्॥ यत्रदेशेचतुर्दशांगुलाविषुवती अस्यांशापंचाशतावदंबायंविधिः॥ संभवति॥ ततोनंतरंसो
नराशिचरखंडानि उत्पद्यंते॥ भवतुनाम॥ तत्रशास्त्रव्यवहारोनस्यात्॥ तस्मादेवंभंगीकृतं॥ यस्मिन्दिनेचराभावःतस्मिन्
त्रिज्यैवांत्यादशप्रमाणादिनदलंपंचदश॥ तद्विशारंकृत्वादशावशिष्यते॥ अतोदिनदलंविशारमित्युच्यते॥ सेवाच्यासाननोत्क्रम
ज्योनितनतकृतिरित्यादिक्रियया ततोत्क्रमज्यैवमाधिता॥ साचखहरास्तुतिनाशेषमभिहतोदरः॥ खहरशाहतमध्याङ्गकर्णानय
नानेभागहारः॥ इष्टकर्णानयनयोहरःमानिमतोज्ञेयः॥ कर्मदृशांनामेतिभावइत्युपपन्नं॥ ॥ अथनतमिति॥ ॥ यदिनतंपंचदश
घटीभ्योधिकंभवतितदानद्विनाढ्यांत्याज्यं॥ शेषमभिमतहरःस्यात्॥ एवमिष्टहरंप्रसाध्यभाज्यंप्रसाधयति॥ तद्यथा॥ प्रथमखं
डमिति॥ चरपलानामर्द्धंकृत्वाचरस्यैवप्रथमखंडेनभजेत॥ ततःस्वगुणितमितिवर्गकार्यः॥ सत्वस्वकीयेनषडंशेनवर्जितःकार्यः
ततोदशाभिरन्वितंपुनरस्यकर्णेनगुणनीयः॥ सहतिसंज्ञःस्यात्॥ साइष्टहरेणहृतासतोइष्टकालिकद्वादशांगुलशंकोश्छायायाअंगु
लाद्यःश्रवःस्यात्॥ खहरेणहृतामध्याङ्गकर्णाभवति॥ हरहृताइत्यनुकृत्वादनुक्रमेणावर्गनत्वं॥ येनहरेणक्रियतेतत्संज्ञःकर्णोभवति॥
भस्योपपत्तिः॥ वंशशलाकाद्वद्वगोलेअहोरात्रवृत्तान्मंडलसंपातयोर्यद्वृत्तंस्यात्॥ तस्यार्द्धंसायुज्योच्यते॥ एवंक्षितिजाहोरा

71
1941

त्रसंपातयोर्बद्धसूत्रंतद्दृग्यास्तसूत्रं॥ तदुभयोःसूत्रयोरंतरंत्वेव॥ अथयाम्योत्तरवृत्तेनसहउन्मंडलक्षितिजसंपातयोःएथक्सूत्रेबद्धे
तयोर्योगसूत्रेभवतः॥ तयोःसूत्रयोःसंपातोगोलमध्येभवति॥ तदुभयोःप्राग्बद्धसूत्रयोश्चसंपातेतयोःकेंद्रसंज्ञेभवतः॥ तेगोलमध्यात्क्षो
तिज्योत्तरएवभवतः॥ उत्तरगोलेउत्तरतोयाम्यगोलेयाम्यतएव॥ अथद्युज्याकुज्ययाउत्तरगोलेयुनादक्षिणगोलहीनायाचक्रियतेत
द्विनाढ्यांसकर्णमित्याउदग्यास्तसूत्रादर्कप्रायसूत्रंतद्विनाढ्यांकोदग्यास्तसूत्रयोरंतरंचहतिसंज्ञास्यात्॥ एवंत्रिज्याचरज्यायायुत
हीनाक्रियतेतावदंत्याभिधाभवति॥ तदप्यहोरात्रसूत्रादर्कप्रायिसूत्रंतद्विनाढ्यां॥ तदुभयोर्नामभेदःनतुसंख्याभेदइतिसंज्ञयाद्युज्या
परिणमनेतिज्ञेयं॥ अंत्यासंज्ञत्रिज्यापरिणामितेज्ञेयं॥ द्युज्यायाश्चापकरणार्थंखंडकानामसंभवत्वात्॥ कुल्यास्वत्रैराशिकेनत्रि
ज्यापरिणामितानकृत्वाननत्रिज्याखंडकैरेवज्याधनुषीसाध्येइतितावदुभयोर्भेदएव॥ एषांसंस्कृतिःकर्णयत्रकिरणावल्यांविस्तरं
दर्शितं॥ तथाचोक्तंसिद्धांते॥ क्षितिज्ययवंद्युगणश्चसाहतिश्चरज्ययैवंत्रिगुणापिसांत्यकेति॥ अथांत्यानतोत्क्रमज्ययावतहीनाक्रिय
तेसाइष्टांत्याभिधास्यात्॥ उक्तंचसूर्यसिद्धांते॥ त्रिज्योदकचरज्यायुक्तायाम्यायांतविवर्जिता॥ अंत्यानतोत्क्रमज्योनेति॥ तथाचकर
णप्रकाशे॥ मेषादिगेर्केचरखंडजीवयात्रिज्यायुतांत्यारहिता तुलादिके॥ तयानतज्योनितथाहतांत्यकास्यादिष्टकर्णद्युदलश्रवोहतेति॥
एवंतोत्क्रमज्यातुगात्यक्त्वात्रिज्यापरिणामितांकृत्वाहतेर्विशोध्यतेतावदिष्टहतिर्भवति॥ उक्तंच॥ द्युज्याहतोयासदलेनभक्तइति॥
एवमत्रत्रिज्यांद्वादशाभिरपवर्त्यकर्मसदृशोनामभेदोहरसंज्ञःस्यात्॥ खमध्येखहरः॥ इष्टकालिकमतसंज्ञोहरइति॥ चरज्ययाद्वाद
शांशाःपंचघटीतुल्योभवतितस्मात्कर्मसंज्ञाघचापार्थंद्वादशापवर्तनःकृतःयावच्चतुर्दशेभ्यःस्वल्पाक्षभातावदस्यव्यवहारसिद्धिःस्यात्॥
भतोगीकृतः॥ एवमंत्याकृपंस्वहरंसंसाध्यनतोत्क्रमज्याहीनःक्रियतेतावदिष्टहतएवोत्पद्यते॥ सेवनतोत्क्रमज्याक्रियोपसंहरणेनलघु
कर्मणासाधितायथा॥ ततकृतिरितित्यादिनाएतत्सूत्रंस्वकृतयंत्रकिरणावल्यांविवृतोदर्शितं॥ यथाभुजांशावर्गःपंचघ्नोगुणोवृत्ताद्भव
संयुक्तः॥ हरोत्यासदलस्यात्रभवेदुत्क्रमसंज्ञनीतिति त्रिज्यापंचघ्नाक्रियतेतावदभ्रशराहतभवति॥ तथावृत्तार्द्धस्यवर्गोनवशतान्वितेए

वमुत्क्रमज्याविधायस्वहृदादपास्यत्रोपमिष्टहरस्यादिति॥ साइष्टांत्यारूपः॥ अथनतमित्यस्योपपत्तिर्यथा॥ पंचदशघटिकानांजीवा
दशात्रिज्यातुल्या॥ तस्मादधिकंतस्यक्रमज्यानद्वादशांशातुल्यघटीतुल्यत्वं॥ अतःपंचदशघटीभ्योयावदधिकस्तावन्नतज्यातुल्यंग्रा
ह्यं॥ तदेवहरसंज्ञंभवतीत्युपपन्नं॥ अथप्रथमखंडकृतमित्यस्योपपत्तिर्यथा॥ एवंहरेउत्पादितेभाज्योत्पत्त्यादनीयः॥ अन्यथानेनोत्पा
दितहरेणक्रमात्फलंग्राह्यमित्याशंक्योत्पद्यते॥ अतएवहरेप्रामिसतिभाज्यांकेनावश्यंभाव्यं॥ तस्माद्भाज्यावश्यमाप्तक्रियायासाध्य
ते॥ यथा॥ प्रथमखंडहृतमित्यत्रकृयुक्तयाकल्प्योनुपातोयथा॥ यदिद्युज्याप्रमाणंत्रिज्याप्रमितंतदात्रिज्यामानंकियन्मानंस्यात॥ ए
वंप्राप्तत्रिज्याप्रमाणंतद्भाजकसंज्ञंभवति॥ तत्परम१५।२२ अस्यसाधनक्रिया॥ द्युज्याकोटिज्याकुज्याभिर्विनानभिध्यति॥ तत्रक्रि
यागौरवमितिरज्यत॥ तस्मादाभिरुत्पन्नचरादेवकर्मोपसंहारेणसंगमानयनमानुकूल्येनकृतं॥ यथा॥ चरस्यश्रेढीगणितरीत्याआदि
श्चतुर्थांशउत्तरार्द्धं चपरिकल्प्यफलमादायतत्त्रिज्यावृत्तोषितपरमभाज्यांकेनानेन॥ २३ सद्यदवाप्तंतद्दशभावर्गेणदशघ्नेनविभजे
त॥ फलंत्रिज्यायांयोज्यं॥ तद्भाज्यांकसंज्ञंस्यादिति॥ सचंद्रोसममितितस्यनिरक्षोनंदशदशभागोचरस्यांकस्यसंसाध्यदृश्यते॥ सचि
शतिशतत्रिज्यायांतनोनुपातोयथा॥ यद्यस्या१२०त्रिज्यत्वाप्तदृग्त्रिज्यायाःकिमिति॥ एतद्दशभिर्विभज्यदशात्रिज्यायाचप्राप्तंय
था॥ एतदक्षकर्णेनसंगुण्यअंत्यज्ययाविभजेत॥ फलमंत्याक्षांकोद्वादशांगुलशंकोश्छायाकर्णोभवतीतिपुनरपिश्रेढीकरणार्थ
मुदाहरणंप्रदर्शयते॥ चरपलाढ्यंवर्गंअक्षभावर्गेणदशाभिनभक्त्वायत्फलंतत्त्रिज्ययायोज्यं॥ ततोनुपातः॥ विंशत्यधिकत्रिज्यायां
तनदात्रिज्यायांकिमितिद्वादशभिर्भाज्यंतद्दृग्त्रिज्यायायांयोज्यं॥ तद्यथा॥ चंद्राढ्यं२५एतत्प्रथमखंडेनानेन५०हृतंजातं[१]स्वगु
णितं[१]स्वषडंशाधिवर्जितं[५] चराढ्यं२५ अस्यवर्गः६२५ अक्षभावर्गेण२५ दशाघ्नेन२५०भक्तोजातः[६२५/२५०] ततोनुपातेकृतेछेदद्व
दशभिर्गुणिते[६२५/३००] अनयोरपवर्तनःकृतः[१२५/६०] अनेनापवर्तितंजातंतदेव[५/२] असौभाज्यःपूर्वोक्तेनहरस्येति॥ भाज्यप्रमा
णसूत्रंक्षितिजाहरात्रसंपातयोःपूर्वापरंबद्धसमंगोलमध्येप्रसारितंदक्षिणोत्तरसूत्रयोःसंपातायाम्योत्तरवृत्तस्थितसर्व



प्रायिकलंकर्णगत्यायत्सत्वंभवतितदेवभाज्यांकंहृतिसंज्ञंस्यादिति॥ तस्मिन्नक्षत्रकर्णगुणेनहृ
तेहरसंज्ञकःकर्णोभवतीत्युपपन्नं॥ एवंकर्णसमानीतिच्छायासाधयति॥ रविभुक्तेनेति॥ क
र्णोद्विधा॥ एकत्रद्वादशभिर्युतः अन्यत्रोनः॥ तयोर्घातस्तस्यपदंछायाभवति॥ अ
स्योपपत्तिः॥ सुगमः॥ तयोर्योगांतराहतिक्रियतेतत्तयोर्वर्गांतरंभवति॥ अथछायानःकाल
साधनमुच्यते॥ अतिविभक्तहृतिरिति॥ फलपदमिति॥ व्याख्या॥ ॥ इष्टछायावर्गयुतेः
अतिरिति पूर्वसंबंधः॥ इष्टाद्वादशाद्यतिरिष्टछायाभवेद्वर्गयुतेःपदंअतिःस्यात॥ अति
विभक्तहृतिः अत्याविभक्ताश्वासौहृतिश्चसअतिभक्तहृतिः खहृत्सातितः सत्वयदवशेषकं
पृथगिदंतत्पृथक्स्थाप्यंस्वस्वनंद१००हतंछलापृथक्स्थितावशेषवर्जितैःखविषयैःहरेतत्फलस्यपदंग्राह्यंतत्तत्रतयदिपृ
थक्स्थितावशेषेदिगधिकंदिग्भ्योधिकंभवतितद्दाहरत्वउन्नतंस्यादिति॥ अस्योपपत्तिः॥ छायासाधनरीत्याग्रस्तविषयेजेयः॥ त
द्यथा॥ इतिकामुंकमिजिनीग्रहणकर्मविनाद्यतिसाधनं॥ इत्यमुनाप्रकारेणकामृकमिजिनीग्रहणकर्मविनेदयतिसाधनंकृतं॥ का
मुंकधनुमिंहजिनीजीवाद्युज्याद्याःएषांतस्यकर्मेतिसाधनप्रकारस्तेनविनाद्यतिसाधनंलब्धितिस्वल्पकर्मणाशीघ्रमागच्छति॥ त
थाकृतं॥ अथविषुवद्दृक्तदक्षिणतउत्तरतोवायरंगोगाशिप्रचारमार्गस्तेषांसंज्ञानांक्रांतिसंज्ञानत्वपरिज्ञानाय॥ क्रांतेःखंडान्युच्यं
ते॥ स्युःक्रांतिखंडानीति॥ निष्युष्टनाडीति॥ व्याख्या॥ ॥ क्रांतिखंडकानिस्फुः॥ क्रांतिप्रथमंयमांगशमाः३६२ द्वितीयंकुंभ्यः
४१ तृतीयंगोनवबाहवः२११ षट्त्र्यश्विनः२३६ खेषुभुवः१५० द्विबाणा५२ एतानिषट्क्रांतिखंडानि॥ अथयुक्तायनांशाग्रहबा
हुभागाः अयनांशैर्युक्तायुक्तायनांशाः॥ युक्तायनांशाश्चासौग्रहस्यबाहोर्भागास्तिथ्युष्टताःसंतःलब्धमितानिखंडानियोज्यानि॥
भाग्यहतशेषकस्यतिथ्यंशकेस्ताःक्रांतिकलाभवंति॥ युक्तायनांशाग्रहगोलधिकाः॥ गोललक्षणमग्रेचंद्रग्रहणाधिकारेवक्ष्यति॥

73
1941

मेषादिषड्भं तु सौम्यगोलः॥ याम्योपरइति॥ अस्योपपत्तिः॥ विषुवद्वृत्तगोलमध्ये वर्तते तन्निरक्षदेशसमं पूर्वापरमित्यर्थः॥ मेषादि
स्थलस्थिमवृत्तेनिष्ठन्भ्रमति॥ तस्मिन्मेषादिषट्राशयउत्तराद्दक्षिणाद्वा तुल्यास्तादक्षिणाद्वा स्थाप्यवनतुमेषादिषट्राशयश्चउत्तरतोद
क्षिणतश्चैकत्रवापतिष्ठतितन्भ्रमतीतिकिं॥ नहिमेषादित्रयंयावत्प्रतिक्षणमुत्तरतः क्रमेणचतुर्विंशत्यंशान्वेपावत्॥ अहोरात्रवृ
त्तेपरिभ्रमन्गच्छतितत्तः परावृत्तकन्यांतेराशित्रयंयावत्॥ तेनैवमार्गेणपुनस्तुलाद्येतदेवविषुवद्वृत्तमाश्रयति॥ एवं तुलादेद
क्षिणतएवराशित्रयंगत्वापुनस्तेनैवयथापरावृत्यतदेवविषुवद्वृत्तेमेषादिस्थलएवाश्रयति॥ एवंभगोलतद्दिक्स्थाक्रांतिरिति॥
परिभाषाज्ञेया॥ एवंसूर्यस्यैव॥ अन्योन्यग्रहनक्षत्राणांस्वस्वविमंडलानुगतत्वात्गोलार्द्धयोर्वैपरीत्यसंभवः॥ मकरकर्कादौपरम
दक्षिणोत्तरंचतुर्विंशत्यंशमंतरंतत्रक्रांतेः परमत्वं॥ एवंनिश्चितक्रांतिमंडलादपिग्रहस्यविमंडलेतिरश्चीनेवर्तते॥ तयोः स
पातेः सपदुत्वसंपातनस्मात्त्रिभेंतरेपरमंस्वविक्षेपांशानुल्यंदक्षिणोत्तरमंतरं॥ परंपृथक्पृथक्ग्रहनक्षत्राणांविमंडलानि
रश्चीनानिविद्यंते॥ नक्षेपवशाद्भुदगोलास्यन्यत्वसंभवः स्यादित्यपपन्नं॥ यतउक्तं॥ नाडिकामंडलानियंगत्राषमः क्रांतिरत
वधिक्रांतिवृत्ताच्छरः॥ क्षेपवृत्तावधिस्तिर्यगेवंस्फुटानाडिकारत्नरेखांतरालेपमः॥ अत्रमितिप्रसंगेन॥ प्रकृतमनुसरामः॥ एवा
प्रायुक्तानांक्रांतिखंडानामुत्पत्तिर्यथा॥ नवयंत्रैः षट्षडानिपंचदशभिरंशैरेकैकं॥ अतोभुजभागास्तिथ्युद्धृतास्तेषामुपपत्ति
स्त्रराशिकेनयथा॥ चतुर्विंशत्यंशानांजीवा अंकरूपात्त्रिपदा४८।४५ यदित्रिज्यायापरमेयं४८।४५ लभ्यतेतदापंचदशानां
जीवयायल्लब्धंतद्धनुरंशानांकलाः २३६२ एतत्प्रथमखंडकंतदात्रिंशज्ज्यायाकिमिति॥ एवंपंचदशात्रिगुणचतुर्गुणपंचगुणाष
ड्गुणाज्ञाज्याभिः पलानिसंसाध्यधनूंषिकृत्वा अधोधः स्थापनानिषष्ठ्यामवर्ण्यकलाः कार्याः॥ तानिक्रांतिखंडानिस्युरित्यपपन्नं॥
अथखंडकैर्विनाक्रांतिसाधनमुच्यते॥ भुजांशोननिघ्नाइति॥ ॥खनागेंदवः१८० भुजांशैरूनानिघ्नाः कार्याः॥ नभगोश्वांशा
हीनाइति॥ तेषामेवनगांश्वांशास्तेनहीनैः कलाषट्दशोनैः त्रिवेदाब्धिभिः साधितास्खंडकैर्विनापूर्वानीतसदृशैरवयवादिति॥ अत्रे

पपत्तिः॥ जीवावत्॥ वाजक्रियमोच्यते॥ परमभुजांशानवति९०भिरूनांश्चत्रिघ्नाश्चरनादेगैवः १८१०० कृताः अत्रचतुर्विंश
भागाक्रांतिरूपत्वेनतस्मादेवचतुर्विंशतिभक्ताजाताः ३३०।३० एतेमूलांकस्ययावतावदंशोनावेन८१०० यावत्तद्युक्ताजाताः
या६०५रू१६२०० अमीएकः पक्षः तथान्यपक्षः भुजांशाः ३०।४८ एतेरश्चूनत्रिघ्नाः कृताः ४५०६ अत्रद्वादशभागाः क्रांतित
स्मात्द्वादशभिर्भक्तालब्धं ३८३ एतदपिमूलांकस्यास्य४५०६ यावतावदंशेनयुक्तंकृतंजातंया ३८३ रू४५०६ उभौजातौसं
मानस्मादुभयोः पक्षयोः समत्वेकृतेजातं या६०५रू१६२०० अत्यक्रांतरभक्तंत्यक्तमित्यादिसमशोधनेकृतेजातौप्रथ
मान्यपक्षौ या१रू० या०रू०० अस्मात्लब्धंयावता या७६६रू०९६ वर्गानं ७७ एतेनगांश्वांशास्ताः॥ आनेनयावत्तावन्मानंस
मूलांकेनहतेलब्धंकृते १०५।१२।५१।४२ आभ्यांपूर्ववल्लब्धं ३२०।३० युक्तेकृतेजातमुभयत्रसदृशमेव॥ ४४२।४२ एते
त्रिवेदाब्धयः कलाषट्दशानाः शोधिताजातंया ७७रू८१०० छे ७७ एतस्य ३३० छे३० समभिति कृतेशोधितेलब्धंयावत्ता
वन्मानं ४४२।४२ इतिचोपपन्नं॥ ॥ एवंक्रांत्यंशानप्रसाध्य अक्षांशानांसाधनमुच्यते॥ दशाब्ध्यन्विति॥ ॥ दशाब्धिभिरन्वि
तानाचामावक्षप्रभाचतस्याः षष्ठिभागः षष्ट्यंशाः अक्षकर्णान्वितः तेनखनंदाहताक्षप्रभाभक्तासतिपलांशाभवंतीति॥ किं
लक्षणाः दक्षिणाइतितेभागैः स्वमध्याद्दिपुनद्वृत्तंसमंपूर्वापरक्षितिजयोर्वद्भूमितिदक्षिणतोनतमितिभावः॥ सएवपलः
इष्टदिनक्रांतिभागैः संस्कृतः सन्तद्दिनज्ञामध्यननांशाभवंतितस्मिन्नहिनेसूर्यः स्वमध्यातेभागैर्मध्याह्ने नमति॥ तद्दि
नज्ञार्कस्याहोरात्रवृत्तंस्वमध्यादुत्तरतोदक्षिणतोवाननंवर्तनइतिपलांशाक्रांत्यंशायोः संस्कारमंत्रलक्षणमग्रेकथमस्ति॥
एकाभ्यादिशोर्योगांतरमिति॥ अस्योपपत्तिः॥ यदाद्वादशाक्षप्रभा१२ तदाक्षकर्णाकिंचिन्न्यूनः सप्तदश१७ अक्षांशाः पंचचत्वा
रिंशत्४५ अत्रदोः कोट्योः समत्वात्त्रैराशिकंकृत्वितंयदिपंचचत्वारिंशत्अक्षांशैर्द्वादशाक्षप्रभातदानवत्यंशैः कियतीतिल
ब्धाचतुर्विंशति॥ अस्यामध्येकर्णसाधितः॥ ७।२ एतत्पक्षप्रभावर्णितं४२२ सर्वत्रैवमक्षभांतरितंदृश्यते॥ तस्माद्दक्षभाग

75
1941

धिनाशेषं ४१० दृशाब्धयोनिष्पन्नाः॥ तथाप्रकारांतरेणोच्यते॥ यथावृत्तपरिधिचतुर्थांशस्यार्द्धं पंचच। चत्वारिंशत् ४५ अंशाः
एषांछायाशंकुतत्त्वेव १२ कर्णः [५००/३०] अमोयावत्तावतायुक्तः [या ३० रू ५००/३०] अस्यपुनश्छायायाः षष्ठांशेयाजितेजातं
या ६० रू १०३० एतत्परिधिचतु [३०] र्थांशस्यार्द्धतोद्विगुणाक्षसमंज्ञातं॥ [या ६० रू ०/३०] अतश्चतुर्विंशत्यासमभिति॥ समोपसोस
मछेदात् [३०] त्यशोधितं ज्ञातं॥ [या ६० रू ०/या ० रू ४०] अस्मात्लब्धंयावतावन्मानं [४१०/६०] दृशाब्धयोनिताक्षप्रभाषष्ठिभागइत्युपपन्नं॥
यत्रत्रिंशदक्षांशास्तत्रत्रिगुणाक्षभयासमंकुर्यात॥ यत्रषष्टिरक्षांशास्तत्रसार्द्धाक्षभयासमंकुर्यात॥ इतिस्वबुध्यैवज्ञेयं॥
अक्षभानवत्यासंगुण्य अक्षांशैर्विभज्यतत्समंकुर्यादित्यभिप्रायइत्युपपन्नं॥ एतद्धनक्षेत्रोपरिशिष्यायदर्शयेत्॥ विस्तार
भयान्नलिखितं॥ ॥ इतिनतीयोधिकारः॥ अथचंद्रग्रहणाधिकाराच्यारभ्यते॥ ॥ तत्रस्फुटतिथ्यानयनमुच्यते॥ नन
विहीनहतैरिति॥ धनमृणमिति॥ ननविहीनाहताश्चतेस्वगुणाश्चननविहीनहतास्तैरेवंविधैः स्वगुणैः ३० स्वशरभानुभु
वः ११२५० विहतासंतोरविहरोभवति॥ किंलक्षणः दृशाभिर्वर्जितः सएवविदशांशाकः स्वर्णीनदशांशैनरहितः [१/१०] मनुविधा
हरः स्यात्॥ एवंनिजहराभ्यांपूर्वमानीतमंदफलेस्वस्वविभाज्यक्रमादर्कंद्वौनंतफलेभवतः॥ तेर्कंद्वौः संस्कार्यंकथमित्य
च्यते॥ धनमृणमिति॥ पूर्वनंतरंवोऋणं॥ पश्चिमननेधनंकुर्यात॥ शशिनिपूर्वनेपश्चिम अनुचमंदफलेऋणेसतिस्व
मितिधनंकुर्यात॥ इतरथाउभयतोपिपूर्वनेपश्चिमनेपिऋणमेवकुर्यात॥ एवंकृतेतोग्रहणेस्फुटतरोभवतः अन्यत्रापितिथ्या
नयनेस्फुटतरोभवतः॥ तत्रयोजनाभावान्नोक्तौ॥ ग्रहणदृग्गणितयोरेवप्रयोजनादुक्तौ॥ अस्योपपत्तिः॥ सूर्यस्यऋणफले
सतिप्रायुन्मंडलपरिधिभागाश्चतुर्दशत्रोक्ताः॥ याभ्योनूनरशितिस्वमध्येत्र्यंशोनाः १३।४० पश्चादुन्मंडलेतेपित्र्यंशोनाः तथाध
नफलेसतिप्राक्त्रिंशदधिकास्त्रयोदश १३।३० मध्येत्र्यंशा नाश्चतुर्दश १३।४० पश्चाच्चतुर्दशैवएषांपरमंतरं २०।३० तथाचंद्रस्य
ऋणफलेसतिप्रायुन्मंडलेषादेनैकत्रिंशत ३०।४० स्वमध्येपूर्वोक्तएव ३।३६ अत्रांतरं ०।५१।५० एवमनुपातेननप्रथमंपरिधिंस्फुटंकृ

77
1941

त्वाननोमंदफलंसाध्यतेतत्स्फुटफलंसमागच्छति॥ तत्फलसंस्कृतोसूर्येंदुस्फुटतरेननकर्मविनैवएवमन्यत्रस्वस्वांतरत्वात्रोक्तं॥
ग्रहणंतु अवश्यमेवकारितत्वादित्थंदृग्गणितेपलब्ध्या॥ तद्यथा॥ प्रोक्तपरिध्यंतरेणमध्यमपरिधौहृतेक्रमात्स्वच्छेदोलब्धो
रवेः छेदः ४ चंद्रस्य ३६ सूर्यछेदः स्वदशांशोनश्चंद्रछेदः स्तस्माद्विदशाकइत्युक्तं॥ एतावुन्मंडलस्थोरेवस्वमध्योन्मंडल
योरंतरात्तेउक्तनज्यानुपातिसिध्यति॥ तद्यथा॥ ननविहीनहतैः स्वगुणैर्हताइत्यादिक्रियाजीवयैवसाध्यते॥ तत्राकर्षसो
क्तयत्रकिरणावत्यांत्रमुदाहृतमस्मि॥ तद्यथा॥ भुजान्यभागवर्गोनापरिध्यंघ्रिकृतिर्गुणः॥ हरस्तदंघ्रिसंयुक्तात्व्यासार्द्ध
स्यक्रमज्यकेति॥ ननविहीनहताः स्वगुणाइतिकृतेसतिभुज्यान्यभागवर्गोनापरिध्यंघ्रिकृतिर्यथास्यात॥ असौभाज्यांकृत
गांघ्रिसंयुक्तपरिध्यंघ्रिकृतिः सएवभाजकः॥ एवंरूपत्रिज्यायांजीवेवजनायथानिदर्शनं॥ एकघटिकायाःजीवा [२०/३०४]
घटिकाद्वयस्य [५६/२६८] त्रयस्य [८२/२६८] एवंसर्वासांघटिकानांमध्येस्वेच्छयाजीवाद्वयंसंसाध्यतत्रोनुपातः॥ यथा॥ रूप
त्रिज्याश्चत्वारिंशा४० द्वरस्तदेष्टज्यायाः किमित्यत्र॥ भागहारेचराशीनामित्युक्तत्वाद्धरस्तएवानुपातोवृत्तेयः॥ चत्वारिंश
तारूपंसंगुणः॥ इष्टज्ययाभागहारः॥ इतिकृतेप्राप्तेफलंएकघटिकायाः ३००६६०।५६ अनयोर्भाज्ययोरसदृशयोः सा
म्यत्वंबीजक्रियया प्रदर्श्यतेयथा॥ अनयोरिष्टंप्रक्षिपेत॥ यथाभाज्यौसमौभवतस्तथंयावतावन्मानंप्रक्षिप्यसमीकरणार्थं
न्यासः॥ [या २० रू १००६० / या ५६ रू १००६०] अत्रलब्धंयावतावन्मानंप्रक्षिप्यसमीकरणार्थंन्यासः १० अनेनोत्थापितौसमौभाज्यौ॥ ११२५०
एतेरवश्च [या ५६ रू १००६०] रभानुभुवउत्पन्नाः॥ यद्यावन्मानंतद्वर्जितात्कृतात्तस्माद्दशावर्जितादित्युक्तं॥ अथपुनरनु
पातोयथायदिरूपछेदेनतत्प्रथमोत्पादितंमंदफलंतदानेनोत्पादितंप्रथमछेदेनमिति व्यस्तत्वात्फलेरूपगुणेस्वस्वछेदहृतेयद्य
भ्यतेनद्वरसंस्कृर्यात्॥ इतिधनमृणसंस्कारः॥ सर्वपरिधींऋणधनत्वंप्रकल्प्यस्वमध्यपरिधिंपूर्वापरपरिधेः शोधयेत॥
यज्जातंतस्मिन्नपरिशिष्यते॥ तथाऋणंधनंवाग्रहंकुर्यात॥ विपरीतंऋणंधनस्मिमितिधनं॥ पू १३।३० स्वम १३।४० प १४ अत्रपूर्वंप

रिधेनऋध्यति॥ तस्माच्छुद्धेव्यस्मिन्नि ऋणं॥ पश्चाच्छुध्यति॥ तस्माधनमेवदत्तिसूर्यस्यैव॥ तथा चंद्रस्य पू ३०।८८ स ३१।३६ प
३२।२८ अत्रमध्यपरिधिः पूर्ववत्तेन ऋध्यतीति व्यस्तत्वाद्धनं॥ परतोऋणमेव॥ धनास्मदा ३०।८४ स ३१।३६ प ३०।८४ अत्रोभय
तोपिन ऋध्यति॥ इति॥ तस्मादृणमेवस्यादित्यपपन्नं॥ अथात्रक्रियाविशेषमात्रंप्रदर्श्यते॥ तद्यथा॥ पूर्वदिनान्यस्मिन्न
पिनिशासूर्याचंद्रमसोः पृथक्कृतंविधायदंडकर्मकुर्यात॥ अहोरात्रननस्यानुपातस्फुटक्रियांविनात्रयोदशद्वादशावाघटिका
त्मकदिनार्द्धस्यवाजीवा अष्टमभत्वंशानोद्वादशसमनामेवकिंनोत्पद्यतेतत्रनवयोऽशानांत्रिज्यायेभवितव्यं॥ ननुएवमाशंक
नउत्पादनीया॥ कस्मात॥ उन्मंडलयाम्योनरक्षत्रयोर्मध्यसंदेवपंचदशघटिकाएवसंभवंति॥ ननुदिनार्धघटिकाः सूर्यमध्य
योर्मध्येदिनार्द्धघटिकासंभवंति॥ तत्रदिनार्धसंभवः॥ नत्रानुपातोविहितः यथाग्रेवक्ष्ये॥ खांशाहतमित्याद्युपपन्नं॥ इतिनते
क्रमभोगविकंयति॥ इत्यमुनाप्रकारेणनतक्रमभोगविकयाएवक्रमजमुदितांतत्रापरंवलनदृश्यनक्रमंउक्तजीवयाऽऽनं॥ तत्रनतस
भोगानंभयादिति॥ एवंस्फुटनतांतिथिंप्रविधायग्रहस्यनालिकसाधनक्रियोच्यते॥ यानेष्यनाडीति॥ ॥स्पष्टार्थं॥ अत्रो
पपत्तिस्त्रैराशिकेनऋगमा॥ यदिमायनाभिः षष्टिघटिकाभिर्भुक्तिस्तुल्याकलाऽलभ्यंतेतदेष्टमावनाभिः कतीतिलब्धाः क
लाग्रहसंस्कार्याः॥ गतघटिकास्मदा ऋणं॥ ल्यघटिकास्मदाधनं॥ एवं कुतेरवचरमालिकः स्यात॥ पूर्णातेसंस्कृतो
सूर्यदृष्टाद्यंतरितोऽलब्धाद्यवयवैः समोभवः॥ अमांतेराद्यावद्यसमवित्यर्थः॥ उक्तंच॥ पूर्णांतुकालेतुसमोऽलब्धोदर्शो
नकालेऽयंवर्ग्रहाद्यशिनि॥ ॥ अथग्रहणसंभवज्ञानार्थंशगनयनमुच्यते॥ ॥सपातेति॥ ॥ याम्योपरदति॥ व्याख्या॥ ॥
पर्वांतकालिकेनपातेनसहसपातश्चासौतात्कालिकश्चंद्रस्यपरोर्ज्याविघ्नाकृतापासनीभंगुलादिद्वारः स्यात॥ सपातशा
तद्गतिगोलदिक्कस्यात॥ सपातश्चंद्रोयस्मिन्गोलेवर्तते तद्दिक्कः शरोभवति॥ गोलचासनाग्रागेवोक्ता॥ मेषादिषट्कंस्व
सौम्यगोलइत्यस्यात्रशरस्योपपत्तिर्यथा॥ शरोनामविमंडलक्रांतिमंडलयोरंतरं॥ शरसंज्ञाभिनिपरिभाषापातस्तुविमंड

79
1941

लापमंडलयोः संपातस्तत्सादृश्यंचंद्रेशराभावः॥ तत्पंडुपिशराभावः॥ त्रिभेंतरेपरमशरः॥ मध्येनुपातोयथा॥ यदित्रिज्यायापरमंश
सप्तत्याऽऽशानद्वयंकलानामंतरंलभ्यतेतदिष्टज्यया किमिति॥ इष्टजीवायाः प्रथमंपरमंशरकलागुणः ततोभागहरस्तस्मादपग
मः॥ नवत्यंगुलानिगुणत्रिज्याभागहारः तयोः त्रिंशतापवर्तनः कृतः गुणकस्त्रीणिचत्वारः॥ भागहारस्त्रीणिचत्वारः॥ अवशिष्टइति॥ त्रि
ज्याकृतामितिमिश्रं॥ प्रसंगोपातत्वात॥ अवनलक्षणमपियथा॥ तेचायनेइति॥ कर्किमृगादौ दक्षिणोनरभवतः॥ अस्योपपत्तिः प्र
जिवदर्शिना॥ कर्क्यादिषट्राशयोदक्षिणाभिमुखंवर्त्तंते॥ मृगादिषट्उत्तराभिमुखंगच्छंतीतिभावः॥ एतेगोयने अयनांशावद्वा
धिनत्वे॥ अंगुलादेः शरस्योपपत्तिगोत्रेवतस्मादुक्तः॥ अथैसर्वत्रकलादेरुपयोगस्तस्मात्साधनार्थंखंडान्युच्यंते॥ खाश्वाइति
व्याख्या॥ ॥ क्रांतिवदिति॥ युक्तायनांशयद्वाद्भागाइत्यादिकर्मणासाध्यः॥ क्रांतिवदिति उक्तंतत्क्रांत्यानयनेक्रांतिपातेक्षिप्त्वा
साध्यते॥ बाहुभागइत्यादिक्रांतिवत्साध्यः॥ कलादिकमानीयत्रिहृतः कार्यः॥ अंगुलादिर्भवति॥ खंडकाखत्रिरपिक्रांतिखंडवत्॥
शेषंस्पष्टं॥ शरंज्ञात्वाचिंतांगुलाद्युच्यते॥ बिंबंविधोरिति॥ व्याख्या॥ ॥ खगतिरिति॥ विधोर्गतिर्युगाद्विभक्तासतीविधोर्बिंबंभव
ति॥ तथारवेर्गतिदस्यहतात्रिशतभक्तासतीरविबिंबंभवति॥ इंदुभुक्तिस्त्रिघ्नतुरंगांशभक्तासतीभूभास्यात॥ क्लिलक्षणार्कभुक्त्यष्टिलवेन
हीना॥ अर्कस्यभुक्तेः सप्तमांशेनहीना॥ अस्योपपत्तिः॥ चंद्रबिंबव्यासयोजनानिखनागांबुधयः॥ चंद्रकक्षयांपंचदशयोजनैरेकैक
कलातद्बिंबयोजनानिपंचदशविभक्तानिलब्धंकलादिबिंबं॥ ३२ त्रिभिः कलाभिरेकैकमंगुलं॥ यतउक्तं॥ कलास्यस्तुत्रिकलमंगुलमि
तिनस्मात॥ त्रिहतंसप्तमंगुलादिबिंबं॥ १०।५० अनेनचंद्रभुक्तिलब्धायुगाद्दयः ७४ इत्युपपन्नः॥ तथासूर्यबिंबयोजनानिद्वि
द्विशरत्नु ६५२२ संख्यानिरूप्यकलायांकलाः २००।१२ एभिर्विहृतेलब्धंकलादिबिंबं ३२।१२ पुनरस्मिन्विहृतेंगुलानि १०।५० अ
नेनरविभुक्तिलब्धाः ५।२८ सगमार्थमेतद्विगुणाः॥ अतोद्विहृताश्चिवासाइत्युक्तं॥ तथाभौमसिः॥ अत्रसमानलंबकर्णि
चतुरस्रंकल्पयित्वासूचीलंबः साध्यः॥ सयावद्दविकर्णोनः क्रियतेतावद्भागाछायाछायाः सूच्यते॥ योजनमयोवशिष्यतेसएवचंद्रक

छायायां यावत्प्रमाणं भूभाप्रमाणयोजनमयं स्यादिति॥ तदेव पंचदशभिस्त्रिभिश्च विभज्यते तदा तदंगुलादि भवति॥ तथा चांकक्रमेण
दृश्यते॥ रविबिंबयोजनानि॥ ६५२२ एतत्क्षेत्रभूमिप्रमाणं भूव्यासो मुखप्रमाणं १५८१ रविकर्णस्तु समलंबः॥ ६८९१०२ तथास्य
भुजकर्णानां प्रयोजनाभावान्नोदाहृताः अस्य सूचीलंबः १०१५९८ असो रविकर्णानः कृतो ज्ञानः २२०४९६ असो भूछायायाः सूच्य
ग्रतनक्षेत्रसंस्थापनं वासनाज्ञप्तये दृश्यते॥ अनेन चंद्रकक्षायां भूभाप्रमाणज्ञानं गुरुकर्मणा सिध्यति॥ लघुकर्मणा साधनार्थं गतिभ्यां
त्रिराशिकमाचार्येणोत्पाद्यापवर्तनः कृतः॥ तद्यथा॥ यदि चंद्रमध्यभुक्तौ १००।३५ भूव्यासो लभ्यते॥ १५८१ तदा स्फुटभुक्तौ किमिति॥ एवं
स्फुटभुक्तेः व्यासो गुणः मध्यभुक्तिभागहारः फलं योजनानि पंचदशभिर्विभज्यते तावत्कलाः लभ्यते॥ पुनस्त्रिभिरंगुलानि स्युः॥ इति भा
गहारत्रयस्य घातः ३५५०६ असो भागहारः भूव्यासो गुणः उभयोः सप्तविंशत्यधिकपंचाशतोः ५२७ अपवर्तनः कृतः॥ गु
णकस्थानेत्रयभागहारस्थाने सप्तषष्टिः इति त्रिघ्नीं दुभुक्तिस्फुरंगांगभक्तेनिमिष्टं॥ चंद्रकक्षायां भूव्यासो लब्धः॥ भूछायायाः स
च्यग्रानेन बिंदुपातानयनफलेन सिताभिताख्येन हानकृते भूछायायथासिनलं लभ्यते तत्त्रैराशिकं॥ यथा॥ यदि रविभुक्तौ ५०।८ भूव्यासे
नरविबिंबव्यासो लभ्यते ४९४ तदा चंद्रभुक्तेः किं फलेन सिताख्यं स्यात्॥ सूच्यग्रतो लब्धं त्रैराशिकं॥ रविगतेर्भूव्यासो नरविबिंबे गुणः
चंद्रगतिभागहारः फलं योजनात्मकं तत्पंचदशाकृताः स्युः॥ तल्लब्धांगुलादि॥ अत्रापि भागहारत्रयस्य घातो यं ३५५०६ पूर्ववद्भो
भागहारः ४९९ अयं गुणः अस्मात्सप्तगुणतस्मादर्कभुक्त्यधिकलवेनेत्यादि सिद्धं॥ अथ छाद्यछादकग्रासाद्युच्यते॥ ॥ राहुरिति॥
व्याख्या॥ ॥ कुभामंडलगः राहुः शशांकं चंद्रमसं संछादयति॥ तथा शशांकः राहुबिंबं संछादयति॥ अतश्चंद्रग्रहणे चंद्रश्छाद्यः॥ भा
नोः राहुश्छादकः सूर्यग्रहणे सूर्यश्छाद्यः चंद्रानुगो राहुः छादकः॥ वक्ष्यमाणयोः छाद्यछादकमंडलयोरेकखंडं नतशरेण सनस्फुटगतिमि
ति ग्रासप्रमाणं भाद्भवंति॥ तदेव पुनश्छाद्येनोनं क्रियते तदवशेषतुल्यमाकाशे बिंबादुपार्यपि छादयति॥ एवं सर्वत्र ग्रहणे ज्ञेयं॥ ॥
अस्योपपत्तिः॥ ॥ चंद्रबिंबमंडलापममंडलयोः संपातश्चंद्रग्रहणे तथा तस्मात्तद्वद्भानरपि॥ एवं स्थानद्वयेशराभावः॥ तत्रिभेतरपरमशरः॥

81
1941

एवं रूपे चंद्रबिंबमंडलमध्यकेंद्रबिंबमंडलसंपातदेववर्त्तने॥ सूत्रस्थमंडलक्रांतिमंडलेनस्माद्भूछायायाः केंद्रादपि क्रांतिमंडलस्य यदा चंद्रस्य
शराभावस्तदा क्रांतिमंडलमाश्रयति॥ एवमुभयोरेकमार्गश्रयत्वाच्चंद्रमंडलभेदः स्यात॥ तदा चंद्रमंडलं भूछायां पश्चिमतः प्रविश्य पूर्वतो
निःसरित्वा द्वाभ्यां तदा तज्जरणसंज्ञं ग्रहणं भवतीति स्वल्पेशरे ग्रास्यादिकस्य संभवः॥ उभयोर्मंडलाग्रयोगाधिके ग्रहणाभावस्तत्र रा
होरकारणत्वं दृश्यते॥ परमिस्फुटे श्रुतिस्मृत्यादिशास्त्रबाधकत्वमुपपद्यते यतउक्तं॥ दिग्देशकालावरणादिभेदेन छादकं राहुरिति
ब्रुवंति॥ यन्मानिनः केवलगोलविद्यास्तत्संहिताविदः पुराणवाद्यं॥ अतो ग्रहणे राहुरपि कारणमस्तीति वेदितव्यं॥ यथोक्तं॥ इंदुर्कमंड
स्यालंबितरमितलाक्षिलनदृश्यतेगगने॥ अन्यत्र पर्वकालाद्दूरदालमलयोनेः॥ ॥ इत्यंगीकृतोभयशास्त्रविरोधादाचार्येणोक्तं॥ राहुः
कुभामंडलगः शशांकः इत्यादि॥ तथा छाद्यछादकमंडलमध्यकेंद्रयोर्बिंबमंडलापममंडलस्थयोर्निमित्तयोरुभयोर्मंडलाद्योगा
वांतरं भवति॥ तस्माद्ग्रहणाभावः॥ तथा छाद्यछादकमंडलार्द्धं तरतुल्ये शरे छाद्यतुल्ये ग्रासः इति॥ पूर्णग्रहणं तस्माद्दिनेनानेकाशया
सः इत्यर्थः॥ इति सिद्धं॥ एवं ग्रहणविषयांज्ञात्वा कालपरिज्ञानमुच्यते॥ ॥ द्विघ्नादिति॥ ॥ द्विघ्नाच्छरात्छन्नयुनात्तहतात्छन्नेन
युनात्छन्नेन मरुताच्चयत्पदं प्राप्यते तत्स्फुटेंदुभिर्निर्गयोर्विवरणभक्तं सत्घटिकादिस्थितिः स्यात्॥ ततो मर्दोपि भवति॥
अत्रोपपत्तिः॥ अत्र स्पर्शान्मध्यग्रहणं यावद्यत्तन्मार्गेण छादकोगच्छतीति तस्य छादकमार्गस्य ग्रासाणां ज्ञातुं त्रिभुजकल्पनाह्ना॥
यथा शरः कोटिरूपः॥ मानैक्यखंडकर्णः॥ छादकमार्गो भुजः॥ यदत्र कोटिकर्णवर्गांतरं मूलं भुजइति सिद्धं॥ ययोराद्ययोर्योगांतरा
हतिः क्रियते तावत्तयोर्वर्गांतरमुत्पद्यते॥ तद्दुक्तं लीलावत्यां॥ योगांतराहतिः॥ वर्गांतरं भवेदिति॥ तदत्र यच्छन्नं तन्मानैक्यखंडय
योरंतरं॥ रूपेद्विगुणे शरायावक्षिप्यते तावदुभयोर्योगो भवति॥ संयोगः अंतरेण छन्नेन गुण्यते तावत्तयोर्वंतरं भवति॥ अतउक्तं॥
द्विघ्नाच्छरात्छन्नयुनाहतादित्यादि सिद्धं॥ तन्मूलं तदंगुलादिमार्गप्रमाणं॥ अंगुलानि त्रिभिर्गुण्यते तावत्कलाभवंति तस्मात्त्रिगुणं छ
न्नानेनानुपाते यद्दिगत्यंतरं कलाभिः पश्चिघटिकालभ्यते तदा भाभिमार्गकलाभिः कति लभ्यंत इति ताः कलाः षष्ट्या संगुण्य गत्यंतरेण

भाज्याः॥ प्राणानीतमूलंप्रथमंत्रिभिः संगुणितंपुनः षष्ट्यासंगुण्यतदुभयोर्गुणकयोर्घातः स्वाष्टेंदवइत्यद्यंतइति अतः स्वाष्टेंदु
निघ्नमित्युक्तं॥ तथामदोनयनेमनोंतराद्दंकर्णइति॥ कल्पनयाप्राग्वत्तन्मदंकस्यासिद्धिः॥ अस्यत्र्यस्रक्षेत्रस्यसंस्थानंपरिलेख
प्रकारेदृश्यतेइत्यपपन्नं॥ अनयोः स्पर्शस्थितिमोक्षस्थितिमर्दार्द्धयोः स्फुटत्वंमुख्यकल्पेगुरुकर्मणावसिध्यति॥ तत्वल्पांतरत्वात
सुगमार्थमनुकल्पेनोच्यते॥ विपेक्षितइति॥ ॥ व्याख्या॥ ॥ विक्षेपतइति शरान्तरविलक्षणात्नागयुगांशाउत्पन्नाः विक्षेपतइति ज्ञेयं॥ मध्यविक्षेपादेतत्कर्मकर्तुंनयुज्यते
भनाद्यंनाड्यादिकंफलंलब्धंतेनफलेनस्थितिद्विधास्थाल्कत्रहीनासंनीक्रमाणेस्पार्शिकमोक्षिकेस्थितीस्यातां॥ अत्रेति अस्मि
न्नेवचंद्रग्रहेपुनरत्रविशेषमाह॥ ॥ ओजपदेति॥ ॥ यदिपातयुतोविधुओजपदेभवतिनसअन्यथेति॥ यत्रयुतानत्रविहीना॥ विही
नातत्रयुता॥ अथवास्पार्शिकासामोक्षिका॥ यामोक्षिकासास्पार्शिका॥ इतिवान्यथा॥ एवमनुनाप्रकारेणविमर्दार्द्धेपिभवति॥ अस्यो
पपत्तिः॥ विक्षेपात्स्थितिमानीयतत्रचंद्रगतयः संगुण्यषष्ट्याविभज्यकलादियत्फलंलब्धंतेनचंद्रेशोध्यतेसस्पार्शिकभंडः स्यात॥
यदियोज्यतेतदासामोक्षिकास्यात॥ एवंपातोपितात्कालिकः कार्यः॥ ताभ्यांस्पार्शिकमोक्षिकाशरोसाध्यो॥ शराभ्यांस्थितीचसाध्ये॥
पुनःस्वसंस्थित्यासंचाल्यतात्कालिकौकृत्वापुनः शरोसाध्ये॥ तोस्फुटेस्पार्शिकमोक्षिकौशरोभवतः॥ पुनस्ताभ्यांस्थितीसाध्ये॥ तेस्फुटेस्थिति
दलेस्मः इतिमुख्यार्थः॥ एतत्कर्मगौरवं॥ तस्मात्क्रियोपसंहारंकृत्वालघुकर्मणानुकल्पोंगीकृतः॥ तद्यथा॥ एवंसिद्धेतेसतिशरस्याष्टचत्वा
रिंशन्नमोभागामध्यस्थितिस्वष्टस्थित्यांतरंतरतः किंचिन्न्यूनाधिकोदृष्टः तस्मादेवमुक्तं विक्षेपइत्यादि॥ तथास्यसाधनं॥ यथास्थि
त्यानयनेकल्पितत्र्यस्रस्यतस्यचतुर्थांश्यः स्थितिः॥ यतोगत्यंतरस्यचतुर्थांशाः स्वाष्टेंदवः॥ तस्यवर्गः षोडशांशास्यत्नीयांशा अ
ष्टचत्वारिंशइति॥ तथाबीजक्रियोपाच्युत॥ चंद्रस्यगतिः ३९०।३५ गत्यंतरे ३३० मानेकखंडे १८।२६ अस्यवर्गः ३४० शरः १४ स्थितिः ३ स्थि
त्यंशानेनशरोयुतोजातः अस्यवर्गः २२५ मानेकार्द्धवर्गेनः शोधितेनशेषं ११५।१५ असौप्रथमपक्षः॥ तत्रोद्वितीयपक्षोयथाशरे २५ य
त्नावद्दलेकृते २५ अनेनस्थितिरूनजाता [या ३ कृ १५ / या०] एतद्दत्येनस्यशरोनिशतांशेनचतुर्भिर्गुणितंजातं [या ३ कृ १५ / या०] यस्यवर्गोद्वितीं

83
1941

यपक्षः॥ याव१४४ या१४४० रू३६०० अनयोः समशोधनार्थंसमछेदीकृत्य॥ [याव१४४ या१४४० रू३६०० / याव११५ या० रू०] पक्षौसंशोधितग्राहित
रूपाणामव्यक्तांकेकृतिसंयुतमित्यादिकरणेनलब्धंयावत्तावन्मानं॥ ४७ त [याव११५ या० रू०] यास्थित्यग्निभागेनोनोकृते
प्रथमः पक्षः १०१ द्वितीयपक्षश्च॥ याव१४४ या१२४० रू३२०४ उभयोः समछेदीकृत्यछेदगमेसमशोधनेकृतेजातोपक्षौ॥ प्राग्वल्ल
[याव३७ या२४ रू०] ब्धंयावत्तावन्मानं॥ ५८ इतिनागयुगांशाउत्पन्नाः विक्षेपतइतिज्ञेयं॥ मध्यविक्षेपादेतत्कर्मकर्तुंनयुज्यते
[याव० या० रू१२०४] यतोमध्यस्थित्याः समसंतरंनभवति॥ शरस्यादृक्षत्वात्॥ तस्मात्स्वस्वविक्षेपात्संभवंतिइति॥ शरस्या
नत्वंतदास्थितेरधिकत्वं॥ ओजपदेभुजस्यदृक्षितस्माच्छरस्यापिर्दृक्षः॥ स्थितेरूनत्वमित्यपचयः॥ युग्मेत्यथेवत्वंमर्दस्यापिवा
मनाज्ञेया॥ स्थितिरितिस्पर्शमोक्षांतरकालः॥ मर्दमिति॥ अदर्शनकालः॥ अत्रयेस्थितिमर्दसाधितस्पर्शात्मंमीलनाद्यमध्यग्र
हणंयावत्कालः॥ सत्वसाधितस्तस्माद्दर्शसंज्ञेवज्ञेया॥ एवंमध्यान्मोक्षकालउन्मीलनकालश्चतेमोक्षसंज्ञेस्थितिमर्दलेभवतइ
त्युपपन्नं॥ एवमेवार्थंप्रकटयइति॥ सूर्योदयादिति॥ युक्तेचेति॥ ॥ व्याख्या॥ ॥ सूर्योदयानथाअस्तमयाच्च सूर्यग्रहणेसूर्यो
दयात॥ चंद्रग्रहणेअस्तमयाच्चगम्येपर्वविरामकालइति॥ एष्येदर्शोपौर्णिमांतेस्फुटमध्यग्रहः स्यात्॥ इतिमध्यग्रहणंभवतिचंद्र
ग्रहणेसमकालकालः पौर्णिमास्यांत॥ सूर्यग्रहणेसत्वलंबनसंस्कृतः स्फुटदर्शांतइत्यर्थः॥ तस्मिन्स्वस्थित्यासमर्देनस्पर्शमर्देन
चवर्जितेसतिस्पर्शसन्मीलनकेक्रमेणभवतः पुनस्तस्मिन्नेवपर्वांतकालेनिमाभ्यामितिमोक्षसंभवाभ्यांस्थितिमर्दाभ्यांयुक्ते
सतिमुक्तिस्तथाउन्मीलनंभवति॥ अत्रोपपत्तिः॥ स्पर्शइत्युभयोः छाद्यछादकमंडलयोर्नैपिसंपर्कस्पर्शः मोक्षइतिबिंबयोः पृथक्
भावः॥ मध्यग्रहणंयावान्ग्रासस्तावतियत्समध्यग्रहणंछाद्यबिंबाधिकोयावान्ग्रासः तावान्सग्रासः॥ अथकालेज्ञातेदिग्ज्ञाना
र्थमुच्यते॥ ॥ स्वांकाहतमिति॥ ॥ सौम्यांतकाशमिति॥ योगांतरज्येति॥ व्याख्या॥ ॥ नाड्यादिनतंस्वांकाहतंस्वछदलेनभक्तं
सलवाभवंति॥ दिनतंदिनदलेनभजेत्॥ रात्रितंरात्रिदलेनभजेत्॥ सूर्यग्रहेसूर्यदिनहतेनचंद्रग्रहेचंद्रदिनहतेनतेनतन्मा

दीनोत्तरास्युरिति लग्नादिनतं भवतीत्यर्थः॥ कदेति स्पर्शस्पर्शकालविमुक्ताविति मोक्षकाले च तज्ज्ञानेषां तन्त्रान्तरयाहनाश्चते अस्
लग्नानेत्रिभज्यया भक्ताः संतस्तदक्षवलनं स्यात्॥ किं लक्षणं सोम्यानकाशे॥ कस्मिन्सति प्रागयनेन नतमति प्राङ्नतेसौम्यांशे॥
प्रत्युङ्नते अनकाशमिति दक्षिणं भवतीत्यर्थः॥ ॥ अस्योपपत्तिस्त्रैराशिकद्वयेन यथा॥ यदि स्वदिनार्द्धेन नतांशास्तत्र्यंतेन नदानत
घटिकाभिः कदा तिनतस्य नवत्यंशागुणः स्वदिनार्द्धभागहारः लब्धं लग्नादिनतं नतोन्यानुपातः॥ यथा॥ यदि त्रिज्यया अक्षांशा
स्तत्र्यंतेन नदानतज्ज्यया तदा किमिति फलं त्रिज्यप्रमाणं मानैकखंडे परिणामितमोक्षजवलनं लग्नादि भवति प्रागपरेन नेत्यादि
स्योपपत्तिरियं यथा॥ निरक्षदेशे विषुवद्वृत्तस्य समं मंडलवर्तने॥ तस्मात्तत्र अक्षजवलनाभावः॥ साक्षे तु विषुवद्वृत्तस्य मध्याया
वद्दिरंशैः दक्षिणेन मतिनावद्दिरंशैरुत्तरश्चवः क्षितिजादुन्नतो भवति तस्मात्तत्र भाक्षितिजस्य यद्ग्रहबिंबस्य प्राचीनावद्दिरंशै
रुत्तरतो चलितो भवति॥ खमध्यस्थस्थाएव॥ तस्मात्खमध्ये तस्याभावः॥ मध्येनुपातः कुतः पूर्वकपाले उत्तरतो चलित्वादुत्त
रं स्यात्॥ पश्चाद्दक्षिणतो वलित्वाद्दक्षिणमिति॥ तदुक्तं मगपरेन नेदृति॥ तथा ग्रस्तोदये ग्रस्तास्ते च विशेषः॥ ग्रस्तोदयस्या
र्धिकं नतग्रस्तास्तमे धिकं नतं स्वदिनार्द्धाद्यावदधिकं भवति॥ तस्मादिनार्द्धवशादंशात्ग्रसाध्यनवतेर्विशोध्यनज्ञीवासाध्या॥
सा अक्षांशैः संगुण्य त्रिज्यया भाज्यानदक्षवलनं स्यात्॥ ग्रस्तोदये उत्तरं॥ ग्रस्तास्ते दक्षिणमिति॥ अस्योपपत्तिः॥ खमध्ये पातात्ते
च अस्याभावः॥ पूर्वापरक्षितिजे अक्षांशाप्रमाणं परमुत्पद्यते॥ खमध्यात्पातात्ते यावत्पूर्वकपालं॥ पातात्ते खमध्यं यावदपरकपा
लं चेत्यमितिष्वमक्षवशाद्वलनमुत्पन्नं॥ परं कोतिमंडलवशादृश्यापन्यथात्वस्यैव भवतितदुच्यते॥ ग्रहस्ययुक्तायनांशास्यति
याद्यस्य ग्रहस्ययुक्तायनांशास्य कोटिजीवासाध्या॥ सा बाणार्धभक्तासती अयनदिक्नतथा नतेर्वोपपत्या अन्यदृग्धनं वलनं भागा
द्यं भवति॥ अस्योपपत्तिः॥ खमध्याद्राशित्रयांतरे क्षितिजे भवति॥ तस्माद्राशित्रययुक्तस्य याभुजज्यासैव कोटिज्या भवति॥ त
स्मात्कोटिजीवेत्युक्तं॥ क्षितिजस्थभुजस्याग्रे प्राक्कस्मिन्कादयनदिशि या वद्दिरंशो वर्ते तेनावद्दिरंशैर्ग्रहबिंबस्य प्राचीनचलिता

85
1941

प्रवर्तनेनुकोरेः कोत्यंशाएव परमं चतुर्विंशत्यंशाः पंचभिर्विभक्तासती यतस्त्रिज्यायाः पंचमांशाश्चतुर्विंशतिः॥ पूर्ववद्दासनेयं॥ ए
वमुभयोः समवायकारणत्वान्मिश्रलवनस्फुटं स्पष्टदिगुच्यते॥ एकोन्यदिशोरिति॥ तयोराक्षजायनांशादिवलनयोरेकान्यदिशो
र्योगांतरज्यासाध्या॥ तथाहतं चतन्मानयोगखंडं च त्रिभज्यया हतं सत्तद्दंगुलाद्यं स्फुटं वलनं भवेत्॥ अयमनुपातोयथा॥ यदि त्रिज्या
मितमानैकखंडे नबिंबमुत्पादितं तस्मिन्नेव वलनवशाच्छायस्य स्फुटादृक्साधिता॥ अतोनेन सहचेत्॥ शिरःकंपनं॥ एतेनैव ग्राहक
बिंबेन परिलेखः क्रियते तदानेनैव सहानुपातः कर्तुं युज्यते॥ अत्र छायाकृतस्य न दोषः इति॥ रवींद्वोः ग्रास्ग्रासमोक्षे विपरीतदिक्के
भवतः॥ इत्यस्योपपत्तिः॥ अत्र वलनेनतात्कालिकी प्राचीदिक्कएव साधिता॥ तस्मात्संमुखापश्चिमा॥ पूर्वक्षितिजविषुवद्वृत्तसंपा
तादादुत्तरस्यां दिशि ग्रात्ग्रबिंबस्य प्राची भवति॥ तदा प्रतीचीचोत्तरतो ज्ञेया॥ रवेः पश्चात्पश्चाः चंद्रस्य पश्चान्मोक्षः॥ तस्माद्र
वींद्वोः ग्रास्ग्रासमोक्षे विपरीतदिक्के इति युक्तं॥ सुगमेयवासना॥ एवं ग्रात्ग्रबिंबस्य दिग्ज्ञानमुक्तं ग्राहकोयत आगच्छति॥ त
ज्ज्ञानं शरवशादेव भवति॥ तदायनं मुख्यकल्पेन प्रागुक्तमपि दर्शितं॥ आचार्येण सुखार्थमनुकल्पेन स्वल्पांतरत्वादुच्यते॥ श
भ्याशरइति॥ ॥ यदि माध्यः शरः भोजपदादुत्पन्न इत्यर्थः॥ तदा स्थितेतरभागेनेति स्थितिखंडेन
द्विधा ऽनयुतः कार्यः॥ तोक्तमात्रथमांत्यबाणोदृतिस्थाशिकमोक्षिप्तो भवतः॥ एवंविधोपि चंद्रग्रहणे एव न तु सूर्यग्रहणे न वलंबन
वशान्नतिवशाच्च्यथा लंबशान्न॥ तस्मान्नत्र नसंभवति॥ तेशाराम्यशमध्यमोक्षकालिकापरदिशिः स्थानदिशैव सूर्यग्रहदेशाः॥ यद्य
तरास्तदोनरेदृश्या॥ इति॥ अस्योपपत्तिः॥ स्थितिप्रमाणं चंद्रगतिः १०१०।३५ अनया स्थितिमात्रगुणितार्धस्थित्या विभक्ता एतद्दंडादि
कं फलं॥ या १०१० ३६०० तत्त्रिरखंडेनाद्येन १० सप्तत्यागुणितं पंचदशाभिर्भक्तं फलं कलादिशारः॥ अंगुलादिकरणे पुनस्त्रिभिर्भक्ता जातः॥
श्रीराम॥ या ५५३०० १६२००० अत्र भाज्याद्राजकृतत्वात्॥ तस्मात्स्थित्यग्निभागउक्तः॥ भोजपदे भुजस्योपचयाच्छरस्यापचयः॥
तस्माद्यमेयुतोन इत्युक्तं॥ अनेन शरेण ग्राहकागमनमुक्तं॥ तथा सूर्यग्रहणे चंद्रो ग्राहकः॥ शरस्तु चंद्रादेवोत्पन्नः॥

तस्माच्छाद्यस्य दिशि ग्रहणागमनं संभवतीति॥ तस्माच्चंद्रग्रहणे छाद्यस्य दिशः शरः स्फुरित्वा कं॥ अथ ग्रहणस्य स्पर्शादिसंस्थानेप्रकटीक
रणार्थं छादकमुच्यते॥ ॥ग्रासार्द्धसूत्रेणेति॥ कं द्राघ्यथा ग्रासइति॥ आद्यंतबाणाग्रगतेइति॥ भूभार्द्धसूत्रेणेति॥ इष्टांगुलानीति॥ ॥ग्रास
ग्राह्यस्य अर्द्धतत्प्रमाणसूत्रेण वृत्तं विधाय तत्रोन्मीलनेक्षखंडसूत्रेण चवृत्तं कुर्यात्॥ किं लक्षणं साधितांशं॥ साधिता आशा यस्मिन्नतस्मा
धितांशं॥ एवं कृत्वा बाह्यवृत्ते मीलनेक्षखंडवृत्ते वलनं यथा दीयं॥ प्राक्स्पार्शिकं पश्चिमतश्चमोक्षं प्राक्स्वस्तिकात् स्पार्शिकं वलनं यस्मि
न्दिशि गणितागतं तस्यामेव दिशि उत्तरार्धं दक्षिणार्धं वा दीयं॥ तथा पश्चिमस्वस्तिकान्मोक्षिकं गणितागतं व्यस्तदिग्ग्रहं दीयं॥ रवीन्दोः प्रा
ग्ग्रासमोक्षौ विपरीतदिक्कइति प्रागुक्तत्वात्॥ एवं चंद्रग्रहणे रवेरनिरविग्रहणे स्पार्शिकमोक्षिकं वलनं पश्चिमपूर्वतो ज्ञेयं॥ पश्चिमस्वस्ति
कात् स्पार्शिकं व्यस्तदिग्ग्रहं दीयं पूर्वतो मोक्षिकं यथागतं दीयमिति॥ ततस्ताभ्यां वलनाग्रकाभ्यां बाणोज्याबद्धयो॥ यत्र स्पार्शिकवलनाग्रेन
स्मावस्पर्शशरो दीयः॥ मोक्षिकवलनाग्रान्मोक्षिको दीयः॥ कथं ज्ञायतेदिति॥ सूर्यग्रहणे गणितागताः स्वदिक्ष्वेव दीयाः॥ चंद्रग्रहे व्यस्तदिशो
दीयाः॥ प्रागुक्तत्वादेवं स्पार्शिकमोक्षिकशरयोः संस्थानमुक्तमध्यशरः कुत्र कस्माद्दीयते॥ तदुच्यते॥ उत्साद्यमत्स्यमिति॥ ॥वलनाग्रकाभ्यां
मत्स्यमुत्साद्य मुखपुच्छसूत्रे कं द्राघ्यथा प्राग्दिशि मध्यशरो दीयः॥ मत्स्यः कथमुत्साद्यते॥ तन्मध्ये यत्सूत्रं तन्मुखपुच्छसूत्रमिति एवं वलनशरा
णां संस्थापनं ज्ञात्वा अथेत्यनंतरं शराग्रकेभ्यो वृत्तैः कृतैः स्पर्शमध्यग्रहमोक्षसंस्थास्युः॥ एतदुक्तं भवति॥ स्पर्शशराग्रगतः ग्राहखंडकेन
वृत्तकृतेमनी ग्राह्यबिंबखंडितं भवति॥ सर्वग्रहणे तु ग्राह्यबिंबाद्भूत्वेव यावदधिकं छाद्यवृत्तं तावदाकाशं छाद्यते॥ छाद्यबिंबस्य योजन
प्रमाणेनानुपातः क्रियते॥ तावद्योजनमाकाशमिति ज्ञेयं॥ तद्यथा॥ यदि बिंबांगुलैर्बिंबयोजनानि तदाधिकग्रसांगुलैः किमिति॥ यथा मो
क्षशराग्राच्छादकार्द्धवृत्तेक्षादबिंबं यत्स्पृष्टं तत्र मोक्षः स्याव॥ एवं स्पर्शादिमोक्षं ज्ञात्वा सर्वग्रहे सन्मीलनोन्मीलनसंभवान् ज्ञानोपयुज्यते॥ २४
अथांकयेन्मध्यशराग्रचिन्हात्॥ आद्यंतबाणाग्रगते चरेखे अंकयेत्॥ एतदुक्तं भवति॥ स्पर्शशराग्रतो मध्ये शराग्रं यावद्रेखा कार्या॥
तथा मध्यशरान्मोक्षशराग्रं यावद्रेखा कार्या॥ ते उभे रेखे इष्टो ग्रग्रहमुक्तिमार्गौ रेखानुगो ज्ञेयौ॥ अनेन मार्गेण ग्रहणागच्छतीति भावः॥

87
1941

ततश्छाद्यछादकबिंबांतराद्ग्रमाणसूत्रेण कं द्राद्दृनाविलिख्य तस्य मार्गस्य च या युतिः सा तन्मार्गयुतिः॥ तस्माद्दयं॥ तस्मिन्मा
र्गे युतिद्वयं पिनाभ्यां भूभार्द्धसूत्रेण वृत्तं विधाय सन्मीलनोन्मीलनके ज्ञातव्ये॥ छादकार्द्धसूत्रेणेति॥ नो कं भूभं एव॥ तस्मात्सूर्यग्रह
णे सन्मीलनोन्मीलनयोरभावः॥ कदाचित्स्वल्पांतरमुत्पद्यते॥ तथा बिंबयोगएव भवति॥ ननु खच्छन्नं॥ उभयोश्छाद्यछादकयोर्बिंब
साम्यत्वात्॥ मानांतरार्द्धनत्यकं॥ तस्यापपत्तिः॥ स्पर्शमार्गवर्तिना छादकेन यत्र स्थित्वा छाद्यबिंबं संपूर्णं ज्ञात्वा छाद्यते तत्कं द्राद्दृनांतरमा
नांतरार्द्धं संभवति॥ कथं छादकार्द्धात्॥ छाद्यार्द्धसूत्रं क्रियते तावत्बिंबांतरार्द्धं भवति शिष्यत इति सुगमं॥ अन्यद्भुजकोटिकर्णान्प्रसाध्य सन्मी
लनकोन्मीलनके साधिते॥ तत्र कर्मगौरवात्क्रममपायोदर्शितः॥ अथ मार्गवशादेव इष्टग्रासोपि सिध्यति॥ तद्यथा॥ मार्गप्रमाणेषि
गण्यंते॥ प्रथमसुभयोपदयोर्मार्गप्रमाणकानि इति विगणय्य इष्टनाड्यादिकं यत्कल्पितं तत्र मार्गांगुलैः संगुण्य स्वस्थित्या विभ
जेत्॥ लब्धानि अंगुलानि इष्टवशान्मार्गे दद्यात्॥ इष्टवशादिति किं॥ यदि स्पार्शिकं कल्पितं तदा स्पर्शशराग्रात्तानि अंगुलानि
दद्यात्॥ मध्यग्रहणात्पूर्वपरमिष्टं तदा मध्यशराग्राभिमुखानि दद्यादिति तत्रैराशिकमेवं तद्यदि स्थितिघटिकाभिर्मार्गांगुलानि
लभ्यंते तदेष्टघटीभिः किमिति॥ एवमिष्टवशात्लब्धांगुलानि दत्वा तदग्रे ग्राहखंडकेन वृत्तं मनि इष्टकालेग्रहणस्य संस्थास्यात्॥
इति ब्रह्मतुल्ये चंद्रग्रहणाधिकारश्चतुर्थः॥ ४॥ ॥अथ सूर्यग्रहणाधिकारः॥ दर्शांतकाल इति॥ दर्शांतकाले त्रिभहीनलग्नं का
र्यं॥ तस्य क्रांतिः॥ तत्क्रांतिश्च पलभा च तयोरंतरं कार्यं॥ कस्मिन्सति भिन्नैकदिक्त्वे सति तेन तभागकास्युः॥ ते पुनः खांकच्यु
ता इति॥ तत्स्थं शेषश्चुनाः संतः उन्नतांशास्युः॥ एतदुक्तं भवति॥ ग्रहणस्य संभवे सति दर्शांतकालिकौ चंद्रार्कौ भाग्वल्लमस्ति
मिकौ कृत्वा तात्कालिकं त्रिभिराशिभिरूनितं लग्नं कुर्यात्॥ तस्यायनांशान्दत्वा भुजान्क्रांतिं कुर्यात्॥ ते क्रांत्यंशा गोलदिग्ज्ञेयाः॥
अनुचपलांशा मेषे संदेवसर्वत्र दक्षिणाः॥ तत्क्रांतिपलयोरंतरं कार्यं भिन्नदिक्के॥ एकदिक्के योगः कार्यः॥ ते दर्शांतकालिकलग्नस्य
त्रिभहीनस्य खमध्यस्थितस्य नतांशा भवंति॥ त्रिभोनलग्नस्य समध्यशंकुरित्यर्थः॥ अस्योपपत्तिः॥ दर्शांते चंद्रार्कौ राश्याद्यव

पयोः समो भवतः॥ भूमध्ये कसूत्रत्वात्तच्छ्रसूर्ययोर्यदि क्षितिजलग्नं भवति तदा भूपृष्ठस्थोऽहं दृष्टिसूत्रेण सूर्यक्षितिजसंगं पश्य
नि तत्र दृष्टिमध्यसूत्रयोरंतरकालो लंबनं भवति सः क्षितिजे च परमस्फुटो घटते॥ एतत्क्षितिजे सूर्ये एव लग्नं भवति तद्यदा त्रिभोनं क्रिय
ते तदा तयोरंतरेण राशित्रयमेव भवति॥ तस्मात्तत्र परमस्फुटं घटते॥ यदा तदेव भूमध्यसूत्रं चरस्वमध्यस्थयाम्योत्तरवृत्तसंगं भवति॥
तत्र मध्यसूत्रदृक्सूत्रयोरैक्यत्वात्तत्र लंबनाभावः॥ तत्र सूर्यं त्रिभोनलग्नं समं भवति रवमध्यक्षितिजयोर्मध्ये वक्ष्यमाणानुपा
नात्सिध्यति॥ अत्र त्रिभोनलग्नं समं कैर्लंबनाभावमिति सिद्धं॥ असौ पक्षः सूर्यसिद्धांते मयाद्यैर्नांगीकृतः॥ यत उक्तं॥ संध्यलग्न
समं भानोर्हरिजस्य न संभवति॥ एतन्मयादीनां मतं भास्कराचार्याद्यैर्नांगीकृतं॥ परंतु एतद्युक्तिमद्दृश्यते॥ अनुचनतघटिका
नामनुपातादंशाश्चिधायतज्जीवयालंबनार्थमनुपातः क्रियते तदपि समीचीनं दृश्यते॥ कारणं प्रकाशाकारणापि न स्पर्शो
गीकृतोऽस्ति॥ अन्यैरपि नामहाद्यैः त्रिभोनलग्नं समं स्यादिपक्षो नांगीकृतः॥ ग्रंथविस्तारभयात्तेषां मतानि नोच्चारितानि॥ यथा त्रिभोन
लग्नस्य ननोन्नतांशाः साधितास्तेषामुपयोगात्स्पष्टं दृश्यते॥ अथ लंबनसाधनार्थमनुपातद्वयमुच्यते॥ त्रिभोनलग्नेति॥ ॥
त्रिभिरूनं लग्नं त्रिभोनलग्नं तदर्कयोर्विशेषज्ञानिर्वियोगः॥ तस्मिन्निनीजीवाखरामभक्तासतिघटिकादिलंबनं भवति न दुन्नतज्यानि
हितेन रवेर्दुरितिज्यया हतं मनस्फुटं भवति॥ तन्निथौ दर्शांतघटिकासु स्वस्वर्णं कुर्यात्॥ अस्योपपत्तिः॥ भूव्यासार्द्धयोजनानि सा
र्द्धाः खांकाद्रयः ७९०।३० एतानि दिनगतियोजनानां पादोनगोक्षेत्रभूमितयोजनानां ११८५८।४५ पंचदशांशानुल्यानि तया
दिनषष्टिघटिकाभक्तं षष्टिघटीनां पंचदशांशो घटीचतुष्टयं॥ एतत्परमलंबनप्रमाणं॥ अथानुपातः॥ यदि त्रिज्यया घटिकाचतु
ष्टयं लभ्यते तदा त्रिभोनलग्नार्कविशेषजीवयाकिमिति॥ अत्र लभ्यते॥ तल्लंबनं मध्यमं॥ यदा त्रिभोनलग्नमध्यांशकुर्नवत्यंशाभ
वंति तदेवं॥ यदि न्यूनलग्नदानुपातः॥ यदि त्रिज्यया एतल्लंबनं तदेष्टज्यया किमिति स्फुटं भवति॥ अथास्य लंबनस्य संस्कारतिथौ
करणार्थमुच्यते॥ त्रिभोनलग्नेति॥ ॥ रवेः सकाशाल्लग्नं त्रिभोनलग्ने अधिकहीनकं सति स्वर्णं कुर्यात्॥ अधिकं स्वर्हीनं ऋणमि
ति॥ एतत्स्फुटीकरणं सूर्यकरणेन साधितं॥ पश्चादणमिति॥ कदाचिन्न संभवति॥ तस्माद्धनिपक्षो न भवति॥ मध्यमलग्नसंभा

89
1941

नात्पादिपक्षो युक्तिमानिति दृश्यते॥ परंतु यदाद्यैर्मदादिभिर्नांगीकृतं तदस्मदाद्यैरपि स्वीकार्यमिति तथैव व्याख्येयं॥ एवं तिथौ लंब
नसंस्कारज्ञानं तासु स्फुटं विलंबनादिकमिति तस्मात्तिथौ लंबनाक्रमं न कुर्यात्॥ एतदुक्तं भवति॥ लंबनसंस्कृतातिथेर्लग्नत्रि
भोनं कृत्वा त्रिभोनलग्नार्कविशेषमिजीत्यादिना लंबनप्रसाध्यगणितागतं तिथौ संस्कुर्यात्॥ एवमसकृद्यावदविशेषः स्यात्॥ एवं कृ
ते सति तिथ्यंतस्फुटं लंबनसंस्कृतस्यात्तद्यथा पूर्ववद्यालंबनमुत्पद्यते॥ तत्तथा॥ यस्योत्तरवशात्ततिरप्युपपद्यते॥ तस्मात्तदुच्यते॥
ननांशजीवेति॥ लंबनसंस्कृततिथ्यंतकालिकत्रिभोनलग्नं प्रसाध्यप्राग्वन्ननांशान्प्रसाध्य तेषां जीवासाननांशजीवासास्वर्कस्ववा
नाकार्यं स्वर्कायेन द्वादशांशेन युता अष्टभिर्हृतास्तानतिर्भवति॥ कथंभूता अंगुलाद्यापुनः किंलक्षणाननांशादिकाः॥ अत्रोपपत्तिः
यथा पूर्वं परवशाल्लंबनोपपत्तिः॥ तथा याम्योत्तरवशान्नतेरुपपत्तिः॥ यथा क्षितिजे परमं लंबनं पादोनास्ताः कलाः ४८।४५ तथा
ननतिरपि परमक्षितिजे नावंत्यस्वकलाः॥ ४८।४५ स्वमध्ये नुरवस्मिके भावः॥ तदंतरालेनुपातो यथा॥ यदि त्रिज्याभिनतज्यया प
रमाणनावंत्यः कलाल्भ्यंते॥ तदेष्टननतज्यया कतीति प्राप्तकलानां त्र्यंशांगुलानि स्फुरंति॥ अत्रत्यघवार्थमपवर्त्य यथा परमकला
